CC-0. Digitized by eGangotri and MIDF- Delhi

गुरूकुलचर्यम्

प्रा. रामहरिदाहालः

जयतु संस्कृतम्
केन्द्रीयकार्यालयः, काष्ठमण्डपः, नेपालः
दूरभाषः ०१-५७०५३७१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् इति संस्थायाः सप्तविंशतितमं (२७) प्रकाशनम्

गुरुकुलचर्यम्

रचनाकारः

प्रा. रामहरिदाहालः

प्रकाशकम्

जयतु संस्कृतम्

नेपालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुस्तकनाम- **गुरुकुलचर्यं नाटकम्**
रचनाकारः प्रा. रामहरिदाहालः
प्रकाशकः - जयतु संस्कृतम्, नेपालः ।
प्रकाशनमितिः - आषाढस्य ११ दिनाङ्के
(नेपाले समायोजितस्य एकोनविंशतितमस्य
विश्वसंस्कृतसम्मेलनस्य (२०८२।३।१२-१६) शुभावसरे) ।
प्रकाशनप्रतिः - पञ्चशतम्
सर्वाधिकारः - रचनाकारे
मूल्यम्- रूप्यकाणि- ३५०/-
मुद्रणालयः- किशोर अफसेट प्रेस प्रा.लि.
ISBN : 978-9937-9491-7-0

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकीयम्

नेपाले २००४ तमे विक्रमवर्षे एकतन्त्रीयस्य राणाशासनस्य विरोधे सर्वश्रीकस्य पूर्णप्रसादब्राह्मणस्य विमर्शे श्रीभद्रशर्म-राजेश्वरदेवकोटा-कमलराजरेग्मी-पद्म-राजाधिकारि-काशीनाथ-गौतमादिच्छात्रनेतृणां नेतृत्वे सञ्चालितं जयतु संस्कृतमिति नामकम् आन्दोलनं नेपालस्य शैक्षिकराजनैतिकेतिहासे महत्त्वपूर्णं स्थानं बिभर्त्ति। एवञ्च २०५४ तमे विक्रमसम्वत्सरे तेन आन्दोलनेन स्वस्य पञ्चाशत्तमवर्षस्योपलक्ष्ये स्वर्णमहोत्सवस्यायोजनां विधाय २०५५ विक्रमसंवत्सरे तदान्दोलनं जयतु संस्कृतमिति संस्थायां रूपान्तरयित्वा अस्याः स्मरणे तीनधारापाकशालायाश्-छात्रावासस्य वाग्रे स्मारकस्तम्भः स्थापितः,अन्ये बहवः कार्यक्रमाः सञ्चालिताः।

तस्यां संस्थायां रूपान्तरितायां सत्यामनया प्राच्यभाषाधर्मसंस्कृति-परम्परामूल्यमान्यतानां संरक्षणसंवर्द्धने प्रचारश्च स्वस्याः प्रमुखमभियानं लक्ष्यीकृतम्। अथ च संस्कृतस्य लोकप्रियतां वर्धयितुं तस्य पठनपाठनयोः प्रक्रियां व्यापिकां सम्पादयितुं संस्कृतग्रन्थानां नेपाल्यां भाषान्तरेषु च अनुवादकार्यक्रमः कल्पितः। अनूदितानां प्रकाशनं संस्कृतस्य प्रचारप्रसारौ च कल्पितौ। नैपालिक्याः संस्कृतेः सभ्यतायाश्च संरक्षणं तदर्थं गोष्ठी-प्रशिक्षण-कार्याशालानां सञ्चालनमित्येतादृशाः कार्यक्रमा आयोज्यमानाः सन्त्यनया।

अस्याः संस्थायाः प्रयासे नेपालस्य नेपालसर्वकारस्य च पुराणतमे समाचारप्रकाशने गोरखापत्रे दैनिके प्रतिमासं संस्कृतपत्रद्वयं २०७२ विक्रमवर्षस्य आषाढमासस्य प्रथमदिनतः (जयतु संस्कृतमिति दिवसतः) पाक्षिकरूपेण प्रकाश्यमानं भजते। एवमेव जयतु संस्कृतमिति संस्थायाः प्रयासे २०७५ भाद्रस्य षष्ठगतदिनतो नेपालटेलिभिजनतः (नेपालदूरदर्शनतः) संस्कृतसमाचाराः प्रसार्यमाणाः विलसन्ति। लोकसेवाऽऽयोगे संस्कृतपत्रमेकं रक्षणीयमिति प्रयासे सर्वाणि पत्राणि साधारणानि कृतानि सन्ति। नेपालप्रज्ञाप्रतिष्ठाने संस्कृतविभाग-सञ्चालने, नेपालस्य मुक्तविश्वविद्यालयेऽन्येषु विश्वविद्यालयेषु च संस्कृतस्य विषयविभागान् स्थापयितुं प्रयासा जायममानाः सन्ति। द्वन्द्वकाले पिहितद्वाराणां संस्कृतमाध्यमिकविद्यालयानां पुनःस्थापनायै संस्कृतगुरुकुलानां सुदृढतायै संस्थेयं सक्रिया वर्तते। उत्तरमहाभारतग्रन्थलेखने, संस्कृते मौलिकग्रन्थानां लेखने, तत्र

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रेरणाप्रदाने संस्थेयं सदा जागरूका अस्ति । संस्कृतनाटकानां लेखने तन्मञ्चने च संस्थेयं कार्यं कुर्वाणा वर्तते ।

मौलिकस्य संस्कृतग्रन्थस्य प्रकाशितस्य च मूल्याङ्कनं विधाय तदाधारेण जयतु संस्कृतम् इति पुरस्कारेण अद्यपर्यन्तं षोडश विद्वांसः पुरस्कृताः सन्ति । १. पं. भीमकान्तपन्थी (२०५६,जगदम्बिकावैभवं महाकाव्यम्) २.पं धनञ्जयमरासिनी (२०५७, हरिहरप्रार्थनापुष्पाञ्जलिः, संस्कृतकाव्यम्), ३. डा हरिहरशर्मा अर्यालः (२०५९, संस्कृकाव्यत्रिवेणी), ४. प्रा.डा. माधवभट्टराई (२०५८), सत्यशाइ- चरितं महाकाव्यम्), ५. प्रा.डा.वेणीमाधवढकालः (२०६०) लिच्छविकालिकाना- मभिलेखानां साहित्यिकं परिशीलनम्), ६. चिकित्सको गोपाल-वैद्यः, किंजल्कः (२०६१ हिमाद्रिमहिमा (काव्यम्), ७. डा.लक्ष्मीकान्तपन्थी (२०६३ ऋतुविचारः सानुवादः) ८. प्रा.डा. टीकारामोऽधिकारी (२०६५, पद्यपुष्पाञ्जलिः, संस्कृतकविता-संग्रहः), ९. पं. लोकनाथलुइँटेलः (२०६६, श्रीरामशरणं मम,(काव्यम्), १०. प्रा.रोहिणीवल्लभपोखेलः (२०६७ भावावर्तः (कविता), ११ प्रा. टीकादत्तबरालः, (२०६८, तत्सम नेपाली व्युत्पत्ति शब्दकोश), १२.प्रा.डा. विष्णुराज-आत्रेयः (२०७१ हनुमदयन-महाकाव्यम्), १३. प्रा. रामहरिदाहालः (२०७३,गतो मदीयो ननु कुत्र देशः, संस्कृतभारतीगौरवम्), १४.डा. लक्ष्मीकान्त पन्थी (२०७५ काव्यमालिका (कविता, ५ खण्डकाव्यञ्च)), १५. प्रा. नीलमणिढुङ्गाना, (२०७८, व्युत्पत्तिमूलक संस्कृत नेपाली शब्दकोश) १६.आचार्य पूर्णचन्द्रढुङ्गेलः, २०७९, देवाधिदेवमहादेव-श्रीनीलकण्ठमहाकाव्यम् ।

संस्कृतवाङ्मयस्य सेवाया आधारेण च संस्कृतविद्वांसो जयतु संस्कृतम् इति सम्मानेन सम्मानिताः सन्ति । तत्र सम्मानिताः विद्वांसः सन्ति- डा. स्वामी प्रपन्नाचार्यः (२०६९ फाल्गुनः), तदनु च विविधोपाधिना सह विद्वांसः सम्मानिताः । २०७२ वैक्रमाब्दस्य आषाढस्य १ दिनाङ्के आचार्यः प्रा.खेमराजकेशवशरणः (प्रवचनशिरोमणिः), प्रा.डा. वेणीमाधवढकालः (संस्कृतविद्याशिरोमणिः) सम्मानितौ । (खेमराजकेशवशरणः,तस्य काष्ठमण्डपं समागन्तुमशक्यत्वात् उपाध्यक्षो विष्णुप्रसाददेवकोटा, सचिवो नवराजकट्टेलश्च, देवघट्टं गत्वा सम्मानं समर्पितवन्तौ ।) २०७६ वैक्रमाब्दस्य फाल्गुनमासे प्रा विद्यानाथोपाध्यायः (तन्त्रन्यायविद्याकेशरी), शरत्कुमारभट्टराई (वेदान्तशिरोमणिः), प्रा. शिवगोपालरिसालः (वेदान्तविद्याकेशरी), प्रा.पुरुषोत्तमभट्टराई (न्यायविद्याकेशरी) च सम्मानिताः । २०८१ वैक्रमाब्दस्य भाद्रमासस्य ७ दिनाङ्के विद्वांसः सम्मानिताः, ते यथा प्रा.डा. ऋषिरामपोखरेलः (वेदविद्याशिरोमणिः),

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रा.डा. दीर्घराजघिमिरे (न्यायवेदान्तकेशरी), प्रा.डा. रामचन्द्रगौतमः (धर्मशास्त्रविशारदः), प्रा.डा. गोविन्दचौधरी (न्यायविद्याकेशरी), प्रा. चेतोनाथ आचार्यः (प्रमाणशास्त्रविशारदः) ।

जयतु संस्कृतमिति संस्थयैव थाइल्याण्डदेशे २०१५ तमे ईशवीयवर्षे षोडशतमे विश्वसंस्कृतसम्मेलने जाते नेपालेऽपि संस्कृतसम्मेलनमेतादृशं स्यादिति अस्मत् प्रतिनिधिद्वारा पत्रं सम्प्रेष्य कृतेऽनुरोधे सा प्रक्रिया अग्रे गता वर्तते। एतादृशस्य सम्मेलनस्य आयोजकेन सर्वकारीयेण विश्वविद्यालयेन भाव्यमिति व्यवस्थायाः सत्त्वात् पुनः जयतु संस्कृतम् इति संस्थया नेपालसंस्कृतविश्वविद्यालयः समनुरुद्धः। तदनुसारेण विश्वविद्यालयेन सर्वापि प्रक्रिया अग्रे सारिता, तदनुसारं वैक्रमाब्दस्य २०७५ आषाढमासे क्यानाडादेशस्य भ्यानकुवरमहानगरे सम्पन्ने विश्वसंस्कृतसम्मेलने नेपालस्य प्रस्तावः स्वीकृतः। अथ च २०१८ ख्रीष्टाब्देअष्ट्रलियादेशे अष्टादशतमं सम्मेलनं सम्पन्नम्। तत्र सञ्जातेन सम्मेलनेन २०२४ तमे ख्रीष्टाब्दे नेपाले तादृशसम्मेलनं भविष्यतीति घोषितमासीत्। तदनु नेपालसंस्कृत-विश्वविद्यालयेन विश्वसंस्कृतसम्मेलनस्य सम्पादनायात्र एका संयोजनसमितिश्च सङ्घटिता समासीत्। संस्कृतविश्वविद्यालयेन तद्व्यवस्थापने विलम्बो विहितः। अतः प्रयासान्तरेण २०८२ वैक्रमाब्दस्य आषाढमासस्य १२-१६, (सन् २०२५ जून २६-३०) दिनाङ्के विश्वसंस्कृतसम्मेलनं जायमानमस्ति। अस्य समायोजने जयतु संस्कृतमिति संस्थाया महती भूमिकास्ति।

भाषाऽऽयोगस्य पाठ्यक्रमविकासकेन्द्रस्य च ध्यानाकर्षणं संस्कृतसम्बन्धे कृतमस्ति। संस्थयानया संस्कृतलोकभाषाभियानमपि सञ्चालितम्। राष्ट्रियजनगणनायां संस्कृतमातृभाषाभियानञ्चाग्रे सारितम्। उच्चस्तरीयाय राष्ट्रियशिक्षाऽऽयोगाय (वि.सं २०७५) चास्माभिर्महत्त्वपूर्णाः परामर्शाः दत्ताः। तत्रास्माभिः प्रत्तान् अनेकान् परामर्शान् स्वीकृत्य आयोगस्य प्रतिवेदनस्य २०-२१ अध्याये ते समाविष्टाः। एवञ्च साधारणशिक्षायां प्रथमकक्षातोऽष्टमकक्षापर्यन्तं संस्कृतपत्रस्य सन्निवेशाय अनया संस्थया महान् प्रयासः कृतोऽस्ति।

अनया संस्थया ग्रन्थानुवादः प्रकाशनयोजना च स्वकीयस्योद्देश्यस्य मूलाधारे समाविष्टास्ति। तदनुसारं पूर्वकार्यसमित्या निवर्तमानेन चाध्यक्षेण प्राध्यापकेन विद्यानाथोपाध्यायेन संस्कृतभाषायां निबद्धानां दार्शनिकग्रन्थानामनुवादः प्रकाशनपरियोजनाचाग्रे सारितासीत्। तस्याः योजनायाः निरन्तरताधुनापि अग्रे प्रवर्द्धमाना एवास्ति। तदनुसारं वेदान्त-न्याय-मीमांसा-तन्त्र-जैन-बौद्ध-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दर्शनानामनुवादः प्रकाशनञ्च विहितमस्ति। संस्कृतभाषायां रचितानां मौलिकग्रन्थानां काव्य-नाटक-कथा-निबन्धादिग्रन्थानां सङ्कलनं, सम्पादनं, प्रकाशनञ्च कुर्वन् अग्रे गन्तव्यमिति संस्थायाः महदुद्देश्यं वरीवर्ति। आवश्यकतानुसारेण सामर्थ्यानुसारेण च ग्रन्थरचना-प्रकाशनानुसन्धानादि-कार्याणि च जायन्त एव।

अनया संस्थया नैरन्तर्येण संस्कृतलोकभाषाभियानं सञ्चालितं सञ्चालयिष्यते च। तस्य कृतेऽनेका गोष्ठ्यः कृताः, करिष्यन्ते च। संस्कृतसम्भाषणशिविराणि सञ्चालितानि, सञ्चालयिष्यन्ते च। सञ्चारमाध्यमेषु संस्कृतस्य प्रचारप्रसारौ कृतौ, करिष्येते चं। अस्याभियानस्य अभिन्नाङ्गत्वेन संस्कृतरूपकसङ्ग्रह-ग्रन्थसम्पादनाय रूपकाणां सङ्कलनस्य, प्रकाशनस्य च योजना विहिता। तदनुसारेण अनेकानि रूपकाणि सङ्कलितानि प्रकाशितानि सन्ति। अस्याभियानस्य क्रमे प्रा. डा. नवराजकट्टेलवरेण स्वकीयानां लघुरूपकाणां लेखनं सम्पादनकार्यञ्च समकारि। कट्टेलस्य 'कर्मफलम्' इति संस्कृतरूपकसङ्ग्रहः प्रकाशितश्च। एवमेव संस्कृतनाटिकाकौस्तुभनामा रूपकसङ्ग्रहश्च प्रकाशितः।

नेपालेऽनया संस्थया संस्कृतलोकभाषाभियानं सञ्चालितम्। २०७६ वैक्रमाब्दे कोभिड-१९ व्याधिकारणेन संसारोऽवरुद्धः। वयं नेपालिनश्च स्वस्यैव गृहे पिनद्धाः। तदवसरे अनया संस्थया सप्तप्रदेशेषु (२०७७ वैक्रमाब्दे) 'नेपालस्य साधारणशिक्षायां संस्कृतस्य आवश्यकता' इति विषये जूमगोष्ठी विहिता। तदनु सप्तप्रदेशेषु (२०७७-२०७८) पञ्चदशदिवससंस्कृतभाषाप्रशिक्षणं विहितम्। सहस्रशो जनैः प्रशिक्षणे भागो गृहीतः। तदैव संस्कृतलोकभाषाभियानस्य महत्त्वं स्थापितम्। एवञ्च २०७८ वैक्रमाब्दे सम्पन्नायां राष्ट्रियजनगणनायां १४९०० जनताभिः संस्कृतं मम मातृभाषा इति पञ्जीकृतम्। षट्सहस्रेण (६०००) जनताभिः संस्कृतं मम द्वितीया भाषा इति, १,३५,००० जनताभिः संस्कृतं मम पूर्वजानां भाषा इति पञ्जीकृतमस्ति। नेपाले १२४ भाषा पञ्जीकृताः सन्ति तेषु संस्कृतभाषायाः क्रमः ५६ तमेऽङ्केऽस्ति। अनेन प्रयासेन अधुना संस्कृतं नेपालस्य राष्ट्रभाषासु स्थापितं वर्तते।

जयतु संस्कृतम् २०५५ इति संस्थायाः संस्थापनापश्चात् आजीवनसदस्यो भूत्वा अस्याः संस्थायाः सक्रियतापूर्वकं सञ्चालने चास्य महनीया स्पृहणीया च भूमिकास्ति। जयतु संस्कृतम् इति संस्था नेपाले संस्कृतस्य संस्कृतशिक्षायाः संरक्षणाय विकासाय, प्रचाराय प्रसाराय च उल्लेखनीयं कार्यं कुर्वाण अग्रे गच्छन्ती वर्तते नेपालस्य संस्कृतप्रेमिणः जानन्त्येव।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालिभाषायां कविता, खण्डकाव्यं, एकाङ्की, समालोचना, लेखाः, रचनादयश्च प्रकाशिताः प्रकाश्यमानाश्च विद्यन्ते। तद्वद् दाहालस्य संस्कृतभाषायामपि कविता, खण्डकाव्यानि, रूपंकाणि, लेखाः, समीक्षाश्च प्रकाशिताः प्रकाश्यमानाश्च सन्ति।

जयतु संस्कृतम् इति संस्था न केवलं रूपकरचनायां प्रकाशने च संलग्ना अपितु संस्कृतनाटकप्रदर्शने च कृतभूरिपरिश्रमशीलास्ति। रूपकाणां प्रकाशानन्तरं रङ्गमञ्चे नाटकप्रदर्शनस्य व्यवस्थायै च प्रयत्ना जायमाना सन्ति। प्रकाशितेषु रूपकेषु संस्कृतनाटकमहोत्सवस्यैव आयोजनां कर्तुमस्माकं प्रयत्नो भविष्यति। संस्कृतनाटकमञ्चनस्य प्रतियोगिताञ्च सञ्चालयितुं शक्यते। पारितोषिकस्य व्यवस्थाञ्च अग्रे सारयितुं पार्यते। संस्कृतनाटकरचनाकारेभ्यः प्रोत्साहनस्य पारितोषिकस्य नाटकप्रकाशनस्य च योजना तु पूर्वमेव घोषिता एव। अस्य कृते प्रा.रामहरिदाहालः लक्ष्याधिकानि रूप्यकाणि प्रदाय जयतु संस्कृतम् नाट्यपुरस्कारस्थापनाय अस्मान् प्रेरितवान् आसीत्। तदनु द्विलक्षराशियुतस्य नाट्यपुरस्कारस्य स्थापना च विहितास्ति। संस्कृतग्रन्थरचनायां ग्रन्थानुवादे च प्रा.डा.. नवराजकट्टेलवेरण च ग्रन्थरचनानुवादपुरस्कारः स्थापितोऽस्ति।

एवमेव नेपालस्य संस्कृतविदुष्यः संस्कृतरचनायमग्रे आगच्छन्तु इति धिया ताः प्रोत्साहनाय, जागरणाय च जयतु संस्कृतम् इति संस्था पृथगेव पुरस्कारस्य व्यवस्थायै चिन्तनशीलाऽस्ति। अस्य कृते अक्षयकोषस्य स्थापनायै मनस्विनां दातृणामन्वेषणं क्रियमाणमस्ति। अस्य कृते जयतु संस्कृतम् इति संस्थायाः निवर्तमानसदस्या श्रीमती विद्याकुमारीवज्राचार्या नारीपुरस्कारस्य कृते अक्षयकोशस्थापनाय एकलक्षं द्रव्याणि दत्वा नारीप्रतिभायाः विकासाय संस्कृचरनायां ताः प्रोत्साहनाय नारीप्रतिभापुरस्कारं स्थापितवती। एवमेव काष्ठमण्डपवास्तव्या श्रीमती-इन्दिरासापकोटा च एकलक्षं द्रव्याणि दत्वा उद्यमशालिनी-महिलाप्रतिभापुरस्कारश्चस्थापितवती।

तस्य यथोचितव्यवस्था च विहितास्ति। नेपाल- संस्कृत विश्वविद्यालयस्य शैक्षिकसेवायामनेकाः विदुष्यः सन्ति परन्तु ते काव्यकृतिरचनायां नैव प्रवृत्ताः सन्ति। अतस्ता अपि संस्कृतस्य रचनायां संस्कृतस्य विकासाय विस्ताराय च प्रवृत्ताः भवेयुरिति जयतु संस्कृतमिति संस्थाया अभ्यर्थनास्ति।

रामहरिदाहालः संस्कृतसाहित्यस्य महान् कविरस्ति अनेन नाटकानि खण्डकाव्यानि, महाकाव्यञ्च लिखितमस्ति। महाकाव्यं प्रकाशनस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतीक्षायामस्ति, झटिति एव तस्यापि प्रकाशनं भविष्यति। अनेनैव विदुषा जयतु संस्कृतम् नाट्य पुरस्कारोऽपि स्थापितः। द्वयोः काव्योः कृते अनेन जयतु संस्कृतम् पारितोषिकम्(२०७५) प्राप्तः। स चासौ विद्वान् (वि.सं. २०११।४।२४) धादिङजनपदस्य बालकुमारी-लीलानाथदाहालयोः पुत्ररत्नत्वेन समजनि। गृहे एव परम्परायां समधीयानो दाहालः रानीपोखरी संस्कृतमाध्यमिकविद्यालयतः मध्यमापरीक्षां समुत्तीर्य वाल्मीकिविद्यापीठात् साहित्यविषयमवलम्ब्य आचार्यपरीक्षां समुत्तीर्णवान्। अनेन विदुषा धादिङजनपदस्यैव राधिकाज्ञानेन्द्रप्रसादयोः कुक्षिजयः सावित्रीनामिकया कन्यया सह पाणिग्रहणं विहितमासीत्। तयोः सन्ततयः यथा सृजना-प्रभा-प्रतिभा-सुधा--सुजातादाहालाः पुत्र्यः सन्ति चेत् पुत्रः प्रसन्नदाहालो आसीत् स चासौ कालयोगात् (२०८१।१२।२७ दिनाङ्के) दिवङ्गतः। स अमेरिकादेशे एरिजोनाप्रान्ते स्थपति (इन्जिनियर) त्वेन कार्यं प्रकुर्वाण आसीत्। अधुना रुविनाम्नी पुत्रवधूः पर्यावरणस्थपतित्वेन अमेरिकादेशे कार्यं कुर्वाणा अस्ति। तत्रैव दाहालस्य विधुनिभा नाम्नी एका पौत्री च विलसति। पारिवारिकपरिस्थितिः सामान्यं सुमधुरम्।

तदनु २०३५ वैक्रमाब्दे (भाद्रस्य १६दिनाङ्कतः) उपप्रशिक्षकरूपेण वाल्मीकिविद्यापीठे पाठयितुं प्रारब्धवान्। स्वकीयप्रतिभया, परिश्रमेण, प्रशिक्षणकौशल्येन च साहप्राध्यापकः, प्राध्यापको भूत्वा बहूनि वर्षाणि अनेन विदुषा संस्कृतसेवा विहिता। एन विभागाध्यक्षो भूत्वा कदा नेपालसंस्कृतविश्वविद्यालयस्य प्राज्ञिकसमितेः सदस्यो भूत्वा च संस्कृतसेवा व्यधायि। अयं सूरिः महेन्द्रविद्याविभूषणं, शिक्षासेवापुरस्कारः, दीर्घसेवापदकं च लब्धवान्। अस्य संस्कृतसाहित्यसूरेः 'अमरभारतीगौरवम्', (२०७३), 'गतो मदीयो ननु कुत्र देशः'(२०७३) संस्कृतकाव्यद्वयं अधिकृत्य २०७३ वर्षस्य जयतु संस्कृतम् पुरस्कारश्च अस्मै दत्तः। अनेनोदारमनस्विना 'जयतु संस्कृतं बालकुमारी- लीलानाथदाहालनाट्यपुरस्कार'श्च स्थापितः।

अनेन नेपालीभाषायां 'नेवारपानी' (२०५७) 'शान्तिको खोजी' (२०५७), 'सावित्री' (२०५८), इति त्रीणि खण्डकाव्यानि व्यलेखि। संस्कृतभाषाया 'अमरभारतीगौरवम्', 'गतो मदीयो ननु कुत्र देशः' इति द्वे खण्डकाव्ये प्रकाशिते स्तः। एन राधेश्यामभट्टराई वरेण लिखितं हलेसीखण्डकाव्यं संस्कृतभाषायां समच्छन्दसि अनुवादो विहितः। शिवपुराणस्य भर्तृहरिशतकत्रयस्य च नेपालीभाषायामनुवादो विहितः। संस्कृतनाटकेषु आचारिकं, गुरुकुलचर्यं, सत्प्रभवम्, दृष्टिसृष्टिः इति चत्वारिनाटकानि चत्वारि कर्मसिद्धि, शान्तिदूतः, प्रत्यादेषणम्, : शान्तिसंविदम् इति .एकाङ्कनाटकानि च विलिखितानि। एतेषां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशनं जयतु संस्कृतमिति संस्थया विहितम्। एवञ्च 'अवधेशचरितं महाकाव्यम्' प्रकाशनस्य प्रतीक्षायमस्ति ।

अनेन ऋतम्भरा-जयतु संस्कृतं-मधुपर्कगोरखापत्र-कान्तिपुर-भानुप्रवाह-इत्यादिषु पत्रिकाषु च लेखाः प्रकाशिताः। जयतु संस्कृतं संस्थया सम्पादितायां संस्कृतकविगोष्ठ्यां प्रतिवर्षं संस्कृतकविता रचिता, श्राविता च, ताश्च कविताः संस्कृतकवितासङ्ग्रहे प्रकाशिताः ।

छात्रजीवतादेव समाजसेवायां संलग्नो दृश्यतेऽयं सूरिः। जयतु संस्कृतं संस्थायाः आजीवनसदस्योऽस्ति । नेपालविश्वहिन्दुपरिषदः, कलङ्कीस्थज्येष्ठनागरिकसमाजस्य च आजीवन सदस्यो वर्तते। अयं कविःपर्वसुधाराभियानस्य परामर्शदाता, कलङ्कीस्थवैदिकसनातनधर्मसंस्थायाश्च परामर्शदाता, धादिङनीलकण्ठप्रज्ञाप्रतिष्ठानस्य मानार्थसदस्यः वर्तते ।

इदं नाटकं सर्वदैव सर्वथैव आचारस्य पालनं विधेयमिति विषये लिखितमस्ति। आचारम् अधिकृत्य कृतो ग्रन्थः आचारिकम् इति व्युत्पत्तिः। अतः अत्र नाटके आचार्यलिखितेन स्वल्पमति आचारहीनं अनुशासनहीनं, मर्यादाहीनं कार्यं विहितं, अनुमतिं विना अग्रजस्य उपवनस्य फलभक्षणं विहितम्। तस्य कृते स स्वयं राजसमक्षं दण्डं याचते, दण्डितो भवति च ।

तथैव नाटकानां प्रकाशनाय कृतभूरिपरिश्रमाय प्रा.डा. विष्णुप्रसादशर्म-देवकोटावराय एवञ्च प्रा. रामहरिदाहालवराय प्रा.डा.मुकुन्दलामिछाने-महोदयाय च हार्दं धन्यवादं कृतज्ञताञ्च प्रकटयामि। अथ च नाटकस्य अध्ययनं, संशोधनं, समीक्षां च कृतवान् प्रा.डा. नूरापतिपोखेलः। एतस्य भूरिपरिश्रमस्य कृते अस्मै विद्वद्वरराय कृतज्ञतामाभारञ्च समर्पयामि। स्वयञ्च कर्मफलम् इति एकविंशति लघुनाटकानि विरचय्य नाट्यसाहित्य विवृद्धये भूरिश्रमः कुर्वाणः संस्थायाः सदस्यसचिवः प्रा.डा. नवराजकट्टेलोऽपि धन्यवादार्हः, अस्यैव सदस्यसचिवस्य सक्रियतायां नाटकानां लेखनं, सङ्कलनं, सम्पादनं, प्रकाशनञ्च सम्भवम्, अनेनैव विदुषः पौनःपुन्यं निगद्य निगद्य रचनाः सङ्कलिता। एवञ्चास्य सङ्ग्रहस्य प्रकाशनाय संयोजिताः अन्ये च संस्कृतप्रेमिणः धन्यवादार्हाः सन्ति। जयतु संस्कृतम्।

अध्यक्षः

डा. बद्रीपोखेलः

जयतु संस्कृतम्

अनामनगरम्, काष्ठमण्डपम्- ३२।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नाटकचतुष्टयीपर्यालोचनम्

प्रा. नुरापतिपोखरेलः

दृश्यश्रव्यभेदेने द्विधा विभक्तयोः काव्ययोरन्यतमं दृश्यकाव्यम्। तच्च काव्यमभिनयप्रधानत्वादभिनेयकाव्यम्, अनुकर्तर्यनुकार्यरूपारोपणाच्च रूपकपदवाच्यम्। नाटकञ्च रूपकेष्वन्यतमं दृश्यकाव्यम्। विशेषलक्षणं विना रूपकाण्युपरूपकाणि च नाटकवद्भवन्ति। यथा- नाटकं ख्यातवृत्तं भवति चेद् प्रकरणं कल्पितवृत्तमयं भवति। काव्यसामान्यलक्षणेन सह दृश्यकाव्येषु नाट्यशास्त्रप्रतिपादितानां नियमानां पालनमप्यावश्यकम्।

आधुनिकसमये नाटकपदेनाभिनेयं सकलमपि काव्यं बुध्यते। प्राच्यकाव्यशास्त्रे तदर्थे रूपकपदं व्यवह्रियते। पुनश्चाधुनिकनाटकानि गद्यमयानि, पद्यमयानि, गेयानि वोपलभ्यन्ते, संस्कृतनाटकानि तु गद्यपद्योभयरूपाणि। इत्थं संस्कृतरूपकाण्यान्तरविषयं लक्ष्यीकृत्य वर्गीकृतानि दृश्यन्ते चेदाधुनिकनाटकानि संरचनां लयं च लक्ष्यीकृत्य पूर्णाङ्गमेकाङ्गमिति गद्यनाटकं पद्यनाटकं गेयनाटकञ्चेति द्विधा त्रिधा वा वर्गीकृतानि लभ्यन्ते। संस्कृतरूपकाणान्तु काचिद् भिन्नैव स्वीया सरणी। तामेव सरणीमनुसृत्य वत्सगोत्रीयेण रामहरिदाहालनाम्ना विदुषा गुरुकुलचर्यम्, आचारिकम्, सत्प्रभावम्, दृष्टिसृष्टि चेति चत्वानि नाटकानि प्रणीतानि।

प्रथमं खलु नाटकं गुरुकुलचर्यम्। नाटकेऽस्मिन् षडङ्का विद्यन्ते। जिज्ञासवो वटवः कथं गुरुकुलं प्रवशन्ति, कथं वाभिभावकाः स्वसन्ततिं गुरुकुलं प्रापयन्ति, शिक्षालये गुरुकुले कृतप्रवेशा वटवः कथं वाचारप्रधानां शिक्षामर्जयन्ति, शिक्षार्जनानन्तरं कथञ्च दीक्षिता जायन्त इति गुरुकुलसम्बद्धाः सर्वेऽपि विषया अत्र निरूपिताः सन्ति। देवघट्टस्थगुरुकुलं मनसि निधाय पौरस्त्यकाव्येषु पुराणादिषु च वर्णितं गुरुकुलमहिमानं स्मारं स्मारं कविरत्र गुरुकुलचर्यां निरूपयति। गुरुकुलरीतेः समग्रतायाः निरूपणं गुरुकुलदेयाचारादिशिक्षायाः प्रतिपादनं च कवेरत्र लक्ष्यम्। अस्मान्नाटकाद्गुरुकुलानां लक्ष्यम्, गुरूणां गुरुता, अन्तेवासिष्वावश्यका नम्रातादयो गुणाश्च प्रकटीभवन्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयमाचारिकं नाटकं सप्तसु अङ्केषु विभक्तमस्ति। तत्र सप्तमोऽङ्को दृश्यद्वये विभक्तोऽस्ति चेदन्ये सर्वेऽप्यङ्का दृश्यविभागरहिताः। वाहुदानदीतटस्थस्वस्वाश्रमनिवासिनोः स्मृतिशास्त्रकारयोः शङ्खलिखतयोरितिवृत्तमवलम्ब्य नाटकमिदं प्रणीतमस्ति। स्मृतिशास्त्रप्रयोजकयोस्तयोः शङ्खोऽग्रजश्चेल्लिखितोऽनुजः। कदाचिदग्रजाश्रमं प्राप्तो लिखितस्तदनुज्ञां विनैव तदुद्यानस्थमाम्रफलं भक्षयति। ज्ञातवृत्तान्तः शङ्खो लिखितस्य तत्कृत्यं चौर्यं मनुते। दण्डार्हत्वाद् दण्डप्राप्तये तं राज्ञः सुद्युम्नस्य समीपं प्रेषयति। राजधर्मं पालयन् सुद्युम्नस्तस्य पाणिद्वयं छेदयति। दण्डप्राप्त्यनन्तरमग्रजेन सहैव प्रातःकृत्यसम्पादनाय वाहुदां प्राप्तस्य लिखितस्य शङ्खतपःप्रभावेण सूर्यनारायणकृपया च पाणिद्वयं रोहति। आख्यानमिदं महाभारतस्य शान्तिपर्वणि राजधर्मपालनस्याऽऽवश्यकताख्यापनाय प्रसङ्गत उद्धृतमस्ति। इदमेवाख्यानमुपजीव्य दाहालेन स्वप्रतिभया नाटकमिदं प्रणीतम्। आचारस्य महिमप्रदर्शनमेव नाटकनिर्मातुरुद्देश्यम्। एतदर्थमेव नाटकनामाचारिकं विहितम्। सर्वैरेव स्वस्वाचारः पालनीयः। स्मृतिकार एव स्वाचारं न पालयति चेदन्ये कथं पालयेयुरिति स्मृतिकारस्य शङ्खस्य धारणा। पुनश्चोपजीव्ये स्वधर्माचरणेन राज्ञः, दण्डग्रहणेन च लिखतस्य सद्गतिर्निर्दिष्टास्ति।

तृतीयं नाटकं सत्प्रभावम्। आदिकाव्यस्य रामायणस्य निर्मातुर्वाल्मीकेः प्रथितं पूर्ववृत्तमवलम्ब्य नाटकमिदं प्रणीतमस्ति। वाल्मीकीये हि रामायणे वाल्मीकिरात्मानं प्रचेतसो दशमपुत्रत्वेन परिचाययति। आदिकाव्यानन्तरं लिखितेषु कतिपयेषु रामायणेषु काव्येषु च रत्नाकरनाम्ना प्रथितो दस्युरेव देवर्षेर्नारदाद् विपरीताक्षरं रामनाममन्त्रमासाद्य तमेव मन्त्रं जपन् तपसा वाल्मीकित्वमवाप रामायणञ्च रचयामासेति तदितिवृत्तमुपलभ्यते। तदेव प्रथितमितिवृत्तमुपजीव्य प्रणीतमिदं नाटकं सप्तभिरङ्कैः समन्वितमस्ति। सत्सङ्गत्या दुर्जनोऽपि सज्जनो जायत इति प्रतिपादनमेव नाटकस्यास्य लक्ष्यम्। न केवलं साधारणा एव जनाः, परं कदाचारपरायणा अपि जना सत्सङ्गतिप्रभावेण स्वजीवनं सफलीकर्तुं परोपकारं च विदधातुं प्रभवन्तीति वाल्मीकेर्दृष्टान्तेन प्रदर्श्यते।

चतुर्थं दृष्टिसृष्टिनाटकम्। यस्य यादृशी दृष्टिः (धारणा) स तादृशमेव जगत् पश्यतीति शीर्षकतात्पर्यम्। महाभारतप्रमुखचरितानां कौरवपाण्डवानां गुरुकुलाध्ययनकालिकमितिवृत्तमवलम्ब्य नाटकमिदं प्रणीतमस्ति। अत्र षडङ्का

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्यन्ते चेदङ्गाश्च विभिन्नेषु दृश्येषु विभक्ताः सन्ति । अत्र सत्पक्षस्य प्रतिनिधिः पाण्डुतनयो युधिष्ठिरः, असत्पक्षस्य प्रतिनिधिर्दुर्योधनः । युधिष्ठिरो भार्तृणां मेलनं कामयते चेद् दुर्योधनः सदैव पाण्डवैः सह वैरं विधत्ते । धर्मात्मजो युधिष्ठिरः स्वदृष्ट्यनुसारं सकलमपि जगत् सद्भिः प्राणिभिः पूर्णं पश्यति चेत् पाण्डवैः सह बद्धवैरो दुर्भावनाकलुषहृदयो दुर्योधनः स्वदृष्ट्यनुसारमेव निखिलमपि भुवनतलं दुर्जनैर्व्याप्तं विलोकयति । न केऽपि पदार्था जना वा स्वभावतो हेया ग्राह्या वा, जनानां दृष्टिरेव तान् हेयान् ग्राह्यान् वा सम्पदयतीति नाटकनिर्मातुस्तात्पर्यम् ।

उल्लिखितानां चतुर्णामेव नाटकानां प्रणेता नेपालसंस्कृतविश्वविद्यालयान्तर्गतस्य वाल्मीकिविद्यापीठस्याऽध्यापकचरः प्रा. रामहरिदाहालः । आजीवनमेव कृतसंस्कृतसाहित्याध्यापनेन, सदाचारादिशिक्षाप्रदानेन स्वान्तेवासिनां सन्मार्गप्रदर्शकेन, वाग्देवतासमाराधनैकलक्ष्येण, 'गतो मदीयो ननु कुत्र देशः' इत्यादिकाव्यनिचयनिर्मात्रा, मर्यादापुरुषोत्तमस्य भगवतो रामचन्द्रस्येतिवृत्तमवलम्ब्य 'अवधेशचरितम्' इति संस्कृतभाषानिबद्ध-महाकाव्य-प्रणयनसंलग्नेन लब्धसारस्वतकृपाप्रसादेन समादरणीयेन गुरुणा रामहरिणा प्रणीतानि नाटकानीमानि नूनं काव्यतत्त्वविलसितानि नाट्यशास्त्रमर्यादानिबद्धानि च । इमानि नाटकानि मूलतः पौरस्त्यनाट्यशास्त्रनिर्दिष्टां सरणीमवलब्य प्रणीतानि ।

सर्वेष्वेव नाटकेषु प्रथितमितिवृत्तं विद्यते । प्रस्तावनया आरब्धेषु नाटकेषु सर्वत्र नान्दीपाठः, प्रस्तावनायां निर्दिष्टानां पात्राणामेव प्रयोगः, तत्र प्ररोचनायाः सन्निवेशः, अङ्कान्ते पात्राणां बहिर्गमनम्, नाटकान्ते भरतवाक्यम्, सुखान्तता चेति पौरस्त्यनाट्यशास्त्रप्रतिपादितानि नियमान्यत्र पालितानि सन्ति । अङ्कानां गद्यपद्यमयतापि सर्वत्र दृश्यते । शास्त्रनिर्दिष्टेषु सम्बोधनादिषु, क्रियापदप्रयोगादिषु च सावधानतावलिम्बितास्ति । सूक्ष्मदृष्ट्या विलोकिते पञ्चसन्धीनां प्रयोगोऽपि प्राप्यते । स्त्रीपात्रादिषु प्राकृतभाषायाः प्रयोगस्तु नैवात्रास्ति विहितः । नेपालदेशे प्रणीतेषु नाटकेषु छविलालसूरिप्रभृतीनां कतिपयानामेव नाटककाराणां नाटकेष्वेव प्राकृतभाषायाः प्रयोगः प्राप्यते । नेदानीं प्राकृतभाषाप्रयोगो नाटकेष्वपेक्ष्यत इति परम्परया ज्ञायते । न चैतावता नाट्यशास्त्रनियमानामुल्लङ्घनं जायते । सर्वेषामेव नियमानामक्षरशः पालनन्तु नानिवार्यमिति सन्ध्यङ्गानां सन्निवेशस्तु रसाभिव्यक्त्यपेक्षयैव विधेयः, न शास्त्रनिर्वहणेच्छया विधेय इति व्याहरतानन्दवर्धनेनापि सङ्केतितमेव ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पौरस्त्यनाट्यशास्त्रमवलम्ब्य प्रणीतेष्वपि रामहरेर्नाटकेष्वाधुनिकनाटकाध्ययनस्य प्रभावोऽपि दृश्यते। अङ्कादौ समयनिर्देशनाद्यागृहस्तस्य प्रमाणम्। अङ्कान्तर्दृश्यानां सन्निवेशोऽप्याधुनिकनाटकाध्ययनजन्यः प्रभाव एव। तेनैवात्र लेखकेन विष्कम्भकप्रवेशकादीनां प्रयोगेऽभिरुचिर्नैव प्रदर्शिता। शास्त्रानुकूलेष्वप्येषु नाटकेषु नाट्यकलायाः पूर्णतः परिष्कारो नानुभूयते, परमिदानीन्तनसंस्कृतनाटकप्रणेतृषु नाटककारः स्पृहणीयः सफलश्च दृश्यते।

नाटककारो रामहरिर्मूलतः शास्त्रीयछन्दोबद्धानां पद्यानां रचयिता। 'जयतु संस्कृतम्' इति संस्थया यदा सर्वेभ्यो विद्वद्भ्यो रूपकानाम् (एकाङ्कानां पूर्णाङ्कानां चाभिनेयकाव्यानाम) प्रणयनाय प्रेरणा दत्ता तदैवानेनापि बहूनि रूपकाणि प्रणीतानि। तेषु 'पुनर्जीवनम्' नवम्यां कक्षायाम्, 'कर्मसिद्धिः' चैकादश्यां कक्षायां पाठ्यांशत्वेन निर्धारिते स्तः। चत्वारि (पूर्णाङ्कानि) नाटकानीदानीमुत्प्रेरकयैव 'जयतु संस्कृतम्' इति संस्थया प्रकाश्यमानानि सन्ति। एतदर्थमियं संस्था, अस्याः संस्थायाः सञ्चालकाः सर्वेऽपि महानुभावा धन्यवादार्हाः। सविश्वासमस्याः संस्थायाः सञ्चालकैर्नाटकावलोकनाय, भूमिकालेखनाय च योऽवसरः प्रदत्तस्तदर्थं ते सर्वेऽपि साधुवादेनाभिन्दनीयाः। अस्याः संस्थाया लक्ष्यपूर्तिः स्यात्, नैपालकसंस्कृतवाङ्मयस्य विकासोऽप्युल्लेखनीयः स्यादित्यहं कामये।

नाटककर्तृ रामहरेर्भाषा सरला प्रवाहमयी च विद्यते। सा च सरलता पद्येष्वपि विलसति। अस्मादेव कारणात् पद्येभ्योऽपि गद्यकाव्यादिव सहजतयैवार्थोऽवबुध्यते। लयमेव पुरःकुर्वता लेखकेन कुत्रचिद्धतवृत्तितापि नैवापसारिता। पद्यकाव्यलेखकतयास्य नाटकेषु पद्यानां बाहुल्यं दृश्यते। विशेषेणेषा स्थितिः सत्प्रभावनाटके दृश्यते। राजशेखरप्रणीतानि नाटकान्यपि पद्यबाहुल्यात् श्रव्यकाव्यानीव प्रतीयन्ते। क्वचित् सहजतयाप्येषा स्थितिर्जायते, परं तन्न पाठकहृदयमुद्वेजयति। उपमादीनामलङ्काराणां रमणीयः सन्निवेशो रामहरेः प्रशस्यः पक्षः। काव्यशास्त्रमर्मज्ञतयैवानेन रसभाववक्रोक्तिप्रभृतीनां काव्यतत्त्वानामप्यौचित्यपूर्णः सन्निवेशो विहितोऽस्ति। अभिनेयतां लक्ष्यीकृत्यैव गद्येषु स्थाने स्थाने सन्धीनां प्रयोगोऽपि नैव विहितोऽस्ति। सम्पादनक्रमे स्वल्पपदानां सन्धिर्विहितोऽस्ति। समग्रतया लेखकस्येयमलङ्कृता प्रसादगुणमयी च शैली पाठकमनोरञ्जयितुं क्षमा। नाटकानीमान्यभिनेयानि च सन्ति।

॥इति॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुरोवाक्

ध्वनीगुणीभूतव्यङ्ग्यत्वेन द्विधा निर्धारितस्य चमत्कारप्राणभूतस्य वाक्यकदम्बस्य काव्यस्य दृश्यश्रव्यत्वभेदद्वयञ्च कृत्वा चातुर्विध्यं काव्यं निर्धारितमस्ति पौरस्त्यवाङ्मये। वस्तुतो ध्वनेर्गुणीभूतस्य चान्योन्यसङ्करसंसृष्ट्याऽनन्तानन्तभेदेषु भवितुं शक्तेश्चापि चातुर्विध्यं सर्वसम्मतं व्यावहारिकदृष्ट्या। तत्र दृश्यं दर्शनार्हं सामाजिकेषु सद्यः प्रभावसर्जनक्षमतायाः कारणात् प्रथमं परिगणितम्। द्रष्टुं शक्यं दृश्यमिति व्युत्पत्तौ सत्यामपि एतत् पठ्यं, श्रव्यं दृश्यञ्चानुभूयते। पठ्यकाव्यापेक्षया दृश्यकाव्यस्य महत्त्वं प्रथमतश्चर्चितं विश्वनाथेन दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतमित्युदीर्य। दृश्ये मानवीयानुभूतिः सुस्पष्टं फलितेव विभाव्यते। समाजस्य वस्तुस्थितेश्चित्रणमभिनयमाध्यमाद् विहितं विलोक्यान्तर्मनसि स्वस्यैव मनः संवेगानां प्रस्तुतिर्भूयमानाऽस्तीत्याकलयति सामाजिकः। दृश्यकाव्यं नृत्यगीतसङ्गीतसंवादानां बाहुल्येन प्रयोगात् सातिशयं प्रीतिदम्। कीर्तिस्तु प्रीत्याविर्भवति। प्रथमस्थानं प्रीतिरेव काव्ये। समाजिकप्रीतिततः, स्वस्यापि प्रीतिः, समाजे स्वस्यापि सत्त्वात्। लोकरञ्जनाय प्रयतमानस्य कवेर्धर्मार्थकामहेतोर्नाट्यविधायाः प्रथममुद्देश्यं समाजस्य प्रीतिरेव भवितुमर्हति। समाजस्योत्थानमेव। तत एव ते आकल्पं जयन्ति जीवन्ति च यशःशरीरेण। ध्वनिकृदाह– जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः। नास्ति येषां यशः काव्ये जरामरणजं भयमिति।

नाट्यस्य मूलं वेदा एव – जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च। यजुर्वेदादभिनयान् रसानाथर्वणादपि इति भरतवचनमत्र प्रमाणम्। दशरूपककृतोवचनमपि नाट्यस्य वेदमूलकत्वं साधयति। यथा–

उद्धृत्योद्धृत्य सारं यमखिलनिगमानाट्यवेदं विरिञ्चि–
श्चक्रे यस्य प्रयोगं मुनिरपि भरतस्ताण्डवं नीलकण्ठः।

इति निगद्य दशरूपककृता चास्य वेदमूलकत्वं संसाध्य महत्त्वमुपरिकृतम्। यच्च नाट्यं वेदवद् महत्त्वाधायितया नाट्यवेदनाम्ना प्रथितं वर्तते। वैदिकसंवादतो नाट्यजगति संवादसर्जनं स्वाभाविकम्। तच्च पाणिनेः समयादपि पूर्वम्। पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोरिति ससूत्रोल्लेखनान्नाट्यसूत्रप्रणयनस्य तन्माध्यमेन नाट्यकलायाः शुभारभणस्य च दर्शनाद् विद्यैषा प्राक्तनी। रामायण–महाभारतकालेषु राजवर्गेण नृत्याभिननयानामायोजनं मुहुर्मुहुर्विधीयमानमासीदिति तत्तत्समयबद्धग्रन्था अत्र

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रमाणभूताः सन्ति। भाससौमिलककालिदासाश्वघोषादीनां समयतः प्रभावशालितया नाटकनाटिकाः सृष्टा अलभ्यन्ते। नाटकान्तं कवित्वम्, आनन्दनिष्यन्दिषु रूपकेषु काव्येषु नाटकं रम्यम्, चमत्कारैकप्राणा रसाः इत्यादिसूक्तानि नाट्यविधायाः सर्वोपरिमहत्त्वं सूचयन्ति।

नैपालकपरम्परायां नाट्यविधा

इन्द्रयात्राया अवसरे दिनाष्टकं यावद् राक्षसनृत्यम् (लाखेनाच) कुमारीभैरवरथयोः परिक्रमणं विष्णोदशानां प्रमुखावताराणामभिनयप्रदर्शनमेवामादीनि सांस्कृतिकप्रदर्शनानि प्रदर्श्य नाट्यविधायाः संरक्षणं काष्ठमण्डपोपत्यकावासिभिर्विहितं दृश्यते। यक्षमल्ल–रणमल्ल– जगत्ज्योतिर्मल्ल–भूपतीन्द्रमल्लप्रभृतयो मल्लराजाः संस्कृते नाटकानि विलिख्य प्रदर्श्य च संस्कृतसाहित्यस्योत्थाने महद् योगं दत्तवन्त इति नास्त्यविदितं विदुषाम्। इदानीं प्रदर्श्यमानानि चलचित्राण्यपि नाटकस्यैव रूपान्तराणि केवलं तत्र वैद्युतप्रविधिः प्रयुक्तोऽस्ति येन दृश्यानि विस्मयावहानि सम्पत्स्यन्ते। अतः कथयितुं शक्यते यद् नाट्यविधा सार्वकालिकी अमरविधाऽस्ति मनस्तोषिणी। इदानीमपि सततं नाटकानि प्रदर्शितानि दृश्यन्ते प्रेक्षालयेष्वन्यत्र च। तत्र सांस्कृतिकसंस्थान–प्रज्ञाप्रतिष्ठानेऽग्रगण्ये। सडकनाटकाभिधान्यपि प्रदर्श्यमानानि सन्तीति नाट्यस्य सर्वोपरिता सिद्ध्यति।

नाट्यस्य सर्वोपरिताया आधारः

क) समाजस्याचरवेशभाषासंस्कृतिव्यवहाराणां यथार्थतया चित्रणम् = अवस्थानुकारः।

ख) गीतनृत्यसङ्गीतानां प्रयोगादधिकमनोरञ्जनकता।

ग) मञ्चे संवादस्य रुचिकरप्रस्तुत्या स्वीयकथनमुदीरितमिव सन्तोषः।

घ) तात्कालिकोद्योगवीरता–समाजोत्थान–युद्ध–
शान्त्यादीनामुल्लेखनादितिहासज्ञानेन साकं स्वसम्पतायां गर्वानुभूतिः।

ङ) भयकोपहर्षोत्साह-करुणाविस्मयादीनांमानवीयमनःसंवेगानां कमनीय-काव्यामाध्यमात् प्रस्फुटीकरणम्।

च) विभावादीनां साधरणीकरणाद् व्यक्तित्वक्षमतादीनां सामञ्जस्येन सार्वकालिकतया, सार्वजनीनतया च घटनानामन्तर्मनसि सञ्चरणात् सुखदुःखतः परस्यालौकिकानन्दस्य सततमनुभवनम्।

छ) आनन्दस्य न जातु विच्छेदः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ज) अभिनयदर्शनानुपदमेव झटिति परानन्दप्राप्तिः ।

झ) राष्ट्रसेवा–परोपकारिता–दुर्भावनात्याग–सुभवावृद्धिरित्यादिबोधः ।

एवमेवं बहुश आधारा लभ्यन्ते नाट्यस्य सार्वजनीनसार्वकालिकानन्दप्राप्तौ ।

नाटकरचनाया उद्देश्यम्

शिक्षायां गुरुकुलीयानुशासनपद्धतिर्निंतरामुपयुक्ता दृश्यते । तत्र च विशेषतो माध्यमिकशिक्षायाम् । गुरुकुलीयापद्धतौ प्रवर्तितानां प्रातः शय्यात्यादारभ्य शौचस्नानजपसम्पादनपूर्वकमध्ययनतत्परतायाः शिष्यस्य गुरुजनेष्वादरस्य गुरोः शिष्यवर्गे स्नेहस्य भोजनशुद्धतायाः मनोयोगपूर्वकं पठनपाठनयोः, वादविवादसाहित्यिकप्रतियोगितयोः, क्रीडायाश्च समयबद्धतयाऽऽयोजनस्येति क्रियाकलापानां संस्थातगतविद्यालयेषु सामुदयिकविद्यालयेषु च समावेशनमवश्यमपि शिक्षायाः स्तरविकासाय हितकरं सेत्स्यतीति द्योतनाय गुरुकुलचर्यमिति पूर्णाङ्कीयं रूपकमुपस्थापितं वर्तते । एवञ्च समाजे, प्रशासने च वर्धमानामुच्छृङ्खलप्रवृत्तिं लक्ष्यीकृत्य प्रवृत्तिरेषा महती हानिकरी व्यक्तिराष्ट्रसमाजानां कृते इति प्रदर्शनमाचारिकरूपकस्योद्देश्यम् । अग्रजस्य वाटिकायां फलितमाम्रफलं भ्रात्रा भक्षितम्, भक्षणात् प्रागनुमतिर्न गृहीतेति दोषे भ्रातुर्भुजयुगलकर्तनं कारयित्वाऽग्रजेन दण्डो दापित इति घटना कियती निर्दयात्मिकेति चिन्त्यते । कीदृशोऽग्रजोऽस्ति यो हि भ्रातरं कठोरातिकठोरं दण्डं दापयति स्वल्पतरापराधे इति । परमत्र दण्डे कठोरतया परिचालिते सत्येव समाजे सुव्यवस्था स्थिरायते इत्यपि न विस्मर्तव्यं भवति । पुरा यथा निष्पक्षतया राजपुरुषात् सर्वसाधारणजनपर्यन्तं समानो दण्डः प्रदीयते स्म, येन समाजे सुव्यवस्था स्थापिताऽसीत् । इदानीं मानवाधिकारः, वाक्स्वतन्त्रता, नैसर्गिकाधिकारश्चेति नामसु यथाविधा उच्छृङ्खलगतिविधयो जायमानाः सन्ति । तत्र प्रमुखकारणं दण्डहीनता, उत पूर्वदण्डस्याप्रदानमेव । दण्डे पुस्कारे च पक्षपातो यत्र तद् राज्यं दुर्बलायते । राज्यं प्रति जनतायाः संरक्षकत्वविश्वासश्छिद्यते । तथा माऽभूदिति सन्देशमाचारिकरूपकेण प्रवाहयितुमिच्छति रूपककृत् । सत्प्रभावमित्यत्र सत्सङ्गतेर्महत्त्वं चर्चितम् । सत्सङ्गतिः कथय किं न करोति पुंसामितिवद् देवर्षेः क्षणिकसम्पर्कात् प्रथिततरो दस्युरपि ब्रह्मर्षित्वं प्राप । दृश्यन्ते च सत्सङ्गत्याः परमपदभाजो ध्रुवबलिप्रह्लादादयः । तत्र दस्योर्ब्रह्मर्षित्वप्राप्तौ नेपालावनौ तपश्चरणमपि प्रथमाधारः । यत एषावनिस्तयोयोगततन्त्रमन्त्राणामाधारस्थलम् । व्यक्तेरारभ्य समाजस्ततः समग्रराष्ट्रं सदाचरणात् प्रभावितं विकसितञ्च भवति चेत् कदाचरणाद् विनष्टम् । एतत् प्रदर्शनं सत्प्रभावानाटकस्योद्देश्यम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दृष्टिसृष्टिनाटके दृष्ट्यनुसारेण सृष्टिर्भवति, सद्विचारेण सभ्यतासृष्टिः, कुविचारेण सम्पताक्षयश्चेति प्रदर्शनपूर्वकं परहितसम्पादनायानुकूलचिन्तनाय च प्रेरितं वेविद्यते ।

साहित्यस्य पौरस्त्यमान्यतामाधृत्य नाटककृता नाटकानि लिखितानि सन्ति । मान्यतेयमास्माकीना सम्पत् पद्धतिश्च । यथासम्भवं नाटकेषु तत्परिपालितमित्यसौ मनुते । नाटकानि शिक्षाप्रदात्युद्देश्यमूलकानि च सन्तीति असौ विभावयति । सन्दर्भेऽस्मिन्नुचितपरामर्शाः प्राप्स्यन्त एवेत्यसौ विश्वसिति ।

एतदीयनाटकचतुष्टयस्याध्ययनं, संशोधनं, समीक्षाञ्च भूरिश्रमेण कृतवते प्राध्यापकवराय नुरापतिपोखरेलमहाभागाय सविशेषं कृतज्ञतां व्याहरामि । नाटकलेखनाय मुहुर्मुहुः प्रेरयन् संस्कृतनेपालीसाहित्यसर्जने लब्धाधिकारो जयतु संस्कृतमिति संस्थायाः सदस्यसचिवः प्राध्यापको डा.नवराजकट्टेलश्च धन्यवादार्होऽस्ति, अनेन संस्कृतरचनायां विधीयमानां प्रेरणां न जातुचिदपि विस्मरति चेतः ।

जयतु संस्कृतमिति संस्था संस्कृतप्रशिक्षण–संस्कृत–सम्भाषण–कविगोष्ठीसञ्चालन–नाटकमञ्चन–कृतिप्रकाशनादौ चिराय सततं संलग्ना जायमानास्तीति संस्कृतवाङ्मयसेविनां प्रमोदावाहः पक्षः । अनया संस्थया नेदीयसि समये लघुनाटकानि बृहदाकारकाणि नाटकानि च प्रकाश्यमानानि सन्तीति बोधनान्तरं बृहदाकारं नाटकचतुष्टयं प्रस्तुतमस्ति तत्परतामालक्ष्य जयतु संस्कृतं संस्थायै तत्रानवरतं कार्यरतेभ्यः अध्यक्षोपाध्यक्षसदस्यसचिवेभ्योऽन्येभ्यः सदस्येभ्यश्च भूरिशः साधुवादान् व्याहृत्येत्यादानीं स्ववचः संक्षिपामि ।

प्रा. रामहरिदाहालः

दिनाङ्काः २०८१/१२/चैत्रशुक्लद्वादशी

कलङ्की, काष्ठमण्डपः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गुरूकुलचर्यम्

पात्रपरिचयः

प्रधानाचार्यः गुरुकुलस्य प्रमुख आचार्यः
बटवः गुरुकुलप्रवेशिनश्छात्राः
परिचारकः गुरुकुलसेवकः
उपाध्यायः गुरुकुलशिक्षकः
अन्तेवासिनः गुरुकुले अध्ययनरत विद्यार्थिनः
उद्घोषकः गुरुकुलस्य कार्यक्रमसञ्चालकः
भुद्रमुखा गुरुकुलस्य परिचारिका
देवदत्तः गुरुकुलस्य परिचारकः
गृहस्थः गृहवासी गुरुकुले समागतः ।

प्रथमोऽङ्कः

अङ्के संस्थाप्य मन्दं रणयति सततं ब्रह्मपुत्रो विपञ्चीं
वाद्यं लास्योपयुक्तं ध्वनयति नितरां नन्दिराजो मृदङ्गम् ।
बाहू विश्वक् प्रसार्य प्रणयभरदृशा पार्वतीमीक्षमाणः
पादावुत्तोल्य नृत्यन्नवतु नटवरो लोकवन्द्यश्चिरं वः ॥

॥ नान्द्यन्ते ॥

सूत्रधारः- अलं विस्तरेण । (नेपथ्याभिमुखं विलोक्य) आर्ये यदि नेपथ्यविधानं पर्यवसितं तदिहागम्यताम् ।

(प्रविश्य) नटी- आर्यपुत्र आगतास्मि ।

आज्ञापयतु किन्नु सम्पादनीयम् ।

सूत्रधारः- जिज्ञासुरेष समाजो गुरुकुलरीतेस्तद् गुरुमहङ्त्वमधिकृत्य गीयताम् ।

नटी- यदार्यपुत्र आज्ञापयति । श्रूयताम्-

गुरुरास्ते पारसवल्
लोहमपि सुवर्णं कारयति यः ।
सुधीकरोति च कुधियं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नमत तं यशस्विनं गुरुवरम् ॥

सूत्रधारः- आर्ये सुमधुरं गीतम्। उचितमेव यद् गुरुरन्तेवासिनः प्रशास्त्यनुशासनम्। प्रतिपादयति च जीवनस्योद्देश्यम्। एष पशोः पृथक् कारयति मानवं सदुपदेशमाध्यमेन। उक्तञ्च विज्ञैः-

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्री गुरुवे नमः ॥

नटी- आर्य ! अनुगृहीताऽस्मि, गुरुमाहात्म्यमवगम्य। सत्यं गुरुरास्ते रन्तिदेव इवोदारो शिविरिव त्यागी, वशिष्ठ इव वशी। यो हि सर्वस्वमर्पयति लोकहिताय, विवेकवर्धनार्थञ्च। विद्याधनं गुरोः कृपयैव लभ्यते।

सूत्रधारः- आर्ये ! तव कथनेन स्मारितं गुरुकुलम्। यत्राध्येतुं प्रविशन्ति जिज्ञासवो बटवस्तदेतदधिकृत्य अभिनीयताम्।

नटी- आर्य!सन्दर्भेऽस्मिन् अस्ति केनचिल्लिखितम् ?

सूत्रधारः- अस्ति, अमरभारतीसेवकस्य वत्सगोत्रीयस्य दाहालोपाह्वस्य रामहरे संस्कृतभारत्यां सुललितभाषानिबद्धं गुरुकुलचर्यमित्यभिधं प्रकरणम्। अलमेतद् गुरुकुलमाहात्म्यप्रकाशनाय।

नटी- आर्य! भारविकालिदासभवभूत्यादिभिः प्रणीतेषु कालजयिषु नाटकेषु विद्यमानेषु अप्रथितकवेः प्रकरणे किन्नु परिषदेषा आकृष्टा स्यात् ?

सूत्रधारः- आर्ये ! तथा नावधेयम्। बहुभिर्बहुधाद्रभिनीतानि तानि नाटकानि, बृहदाकारकाणि। नास्त्यधुना तावान् समयो जनपरिषदि यद् बहुकालं यावद् नाटकं पश्येत्। अतिव्यस्तः किल वर्तमानसमाजः। यो हि उदरपूर्तये अधिककालं वाहयति। समाजोऽसौ ज्ञानार्जने, मनोरञ्जने वा बहुसमयं विभक्तुं न पारयति। अथ च नूतनकवे रुपकावलोकनायोत्सुका परिषदेषा। रुपकस्य लघिम्नो, विषयस्य गाम्भीर्याच्च प्रदर्शनमेतदुपयुक्तं सेत्स्यति।

नटी- अवगताऽस्मि। (प्रणिधाय) आर्य, कथमिदानीं श्रूयन्ते मङ्गलध्वनयः।

सूत्रधारः- आर्ये ! एता गुरुकुवासिभिरन्तेवासिभिः सविधि स्पष्टमुदीरिता वेदवाचः। अधुना एतासां मन्त्रवाचां श्रवणेन पाविताः स्म। यतः-

वासो नवीनं परिधाय शुभ्रं
विहाय गेहं नवजीवनार्थम्।
मृत्युञ्जयं ज्ञानमवाप्तुमेते
यान्तीह छात्रागुरुसन्निधाने ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(इति निष्क्रान्तौ) ॥ इति प्रस्तावना ॥

(ततः प्रविशन्ति परिहितशुचिवाससः पुस्तकपुस्तिकाधारिण उपवीतिनः सशिखा बटवः । बद्धधम्मिल्लाः काश्चन छात्राश्च ।)

वटुः- पितृबन्धुसम्बन्धिनां प्रेरणया गुरुकुलमायाताः स्म । कुत्र खलु गुरवः स्युः ?

(निपुणं निरीक्ष्य) (आत्मगतम्) आ ! सन्ति गुरवोऽध्यापनाय कक्षां प्रविशन्तः । धन्यः खलु गुरुवर्गः ।

तथा हि -

मेघो यथा वर्षति लोकहेतो
स्तस्मिन् न चास्ते किल स्वार्थलेशः ।
तथैव निस्वार्थतयैष विद्या-
मस्मद्हितायैव ददाति नित्यम् ॥

वटुः- (प्रधानाचार्यमुपसृत्य) अभिवादयामआचार्यवरम् ।

प्रधानाचार्यः- आयुष्मन्तो भवत वत्साः ।

वटुः- विद्यार्जनाय गुरुचरणसमक्षं प्राप्ताः स्म । अनुगृह्णन्तु उपाध्यायाः विद्याप्रदानेन ।

प्रधानाचार्यः- अत्रान्येऽपि पटवो बटवः सन्ति अध्ययनरताः । केचन प्रश्ना युस्माभिः समाधेयाः भवन्ति येन अस्माकं कृते कश्छात्रः कस्यां कक्षायां प्रवेशार्ह इति निर्धारणे सौकर्यं सेत्स्यति ।

वटुः- प्रश्नोत्तरणाय अवहिताः स्म ।

प्रधानाचार्यः- अहमन्यैः उपाध्यायैस्सहविमृश्य वच्मि । दूरभागादागतान् युस्मान् श्रान्तानिवावगच्छामि । तदिदानीमतिथिशालायां विश्रमत ।

(परिचारकम् आह्वयति)

भो परिचारक ! एतान् बटून् अतिथिशालायां विश्रामार्थं नय ।

परिचारकः- यदाज्ञापयति आचार्यः ।

(बटूनवलोक्य) इत इतो भवन्तः ।

वटुः- मार्गे आश्रमसौन्दर्यं विलोकयन्ति ।

कश्चन वटुः- (आश्रमतरुनालक्ष्य) गायति-

छायां वितीर्य पथिकान् बहु तोषयन्ति ।
वासं प्रदाय विहगानपि मोदयन्ति ।
पुष्पैः फलैर्ज़नमनः सहसा हरन्ति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नूनं सतां व्रतमिमे तरवश्चरन्ति ॥

अन्ये बटवः- साधु गीतं, साधु गीतं,
साधु गीतं सखे
अस्मदीयं चित्तमेतत्
साधु नीतं सखे ॥

परिचारकः- पश्यत बटव : एष आश्रमः, एतत् तुलसीवनम्, यत्र तुलसीविरूधां सुवासं पवनो हरति, यञ्च घ्राणं घ्राणं स्वस्थचेताः स्फूर्तिमाञ्च भवति मानवः । एतासु तुलासीविरूत्सु बटवो नित्यं जलं पातयन्ति । गुरवस्तुलसीविरूधः प्रपूज्य जलमर्पयन्ति । जलपानावसरे जलस्योपरि, प्रसादग्रहणावसरे प्रसादस्योपरि च तुलसीपत्रं निक्षिप्यते । सतुलसीपत्रस्य जलस्य पानाद् उदरभवा विकारकारिणः सूक्ष्मकृमयः प्रभावहीनाः सम्पद्यन्ते । तुलसीपत्रमिश्रितस्य अन्नस्य भक्षणात् स्वस्थं भवति शरीरमिति गुरवो वदन्ति ।

वटुः- परिचारक ! त्वं गुरुवचनं सम्यक् परिपालय । तत् तव हिताय सेत्स्यति ।

परिचारकः- एवमेवं बटवः ! तथैव साधयितुं प्रयतिष्ये ।

वटुः- (सालवालान् तरूक्षुपानवलोक्य)
एतेषु क्षुपेषु आलवालरचनं किमर्थमाचरितम् ?

परिचारकः- आलवाले निक्षिप्तं जलं सारल्येन क्षुपानां मूलेषु प्राप्नोति, येन इमे जीवन्ति । यथा मानवा अन्नं जग्ध्वा जलं पीत्वा च जीवन्ति । यथा च पशवो घासं चरित्वा जलं निपीय च जीवन्ति । तथैव तरवोऽपि जीर्णगलितपत्रादीनि मलरुपेण, जलं पेयरुपेण च प्राप्य स्वस्था भवन्ति । अत एवालवालं रचितमिति ।

वटुः- स्यादेवम् ।

परिचारकः- (अतिथिशालां दर्शयन्) एषाऽतिथिशाला । अत्र भवद्भ्योऽन्नपानावासांसि मिलिष्यन्ति । तदुपयुज्य गुरोरागमनं प्रतीक्ष्यताम् । अहमतिथिशालायां बटवः प्रतीक्ष्यमाणाः सन्तीति विनिवेदयामि ।

वटुः- त्वरितं विनिवेदय ।

परिचारकः- भवति, विनिवेदयामि यथासमयम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(इति निष्क्रामति)

(ततः प्रविशति तिलकितभालः परिहितधौतोत्तरीयोगुरुकुलोच्चमाध्यमिकविद्यालयस्य प्रधानाचार्यः ।)

वटवः- (सर्वे उत्थाय सभक्ति आचार्यं प्रणमन्ति) भो आचार्य ! एते वयं बटवोऽभिवादयामहे ।

(ततः क्रमशः एष कृष्णहरिरहमभिवादये, शिवरामोऽहमभिवादये इत्येवं क्रमेण बटवः परिचयं ददति)

प्रधानाचार्यः- (उपस्थितानां सर्वेषां बटूनां शिरांसि दक्षिणकरेण स्पृष्ट्वा वदति ।) आयुष्मन्तो भवत सौम्याः ।

वटवः- अनुगृहीताः स्म ।

प्रधानाचार्यः- अपि भुक्तमशनजातम् । पीतं पयश्च ?

वटवः- आचार्य ! भुक्तं पीतञ्च यथेच्छम् ।

प्रधानाचार्यः- युस्मासु कस्य किं नाम, कुतः आगमनम् ? केन प्रेषितः, कौ पितरौ कथमत्रागमनम् ? किमुद्देश्यम् ? सानुशासनपालनं पूर्णसमयं दत्वा विद्यापीठे स्थातुमर्हथ वा न ? चेति एकैकं कृत्वा ब्रूत ।

वटुः- भगवन् ! एवमेव क्रियते ।

(ततो बटव उत्थाय एकैकं कृत्वा प्राचार्यस्य प्रश्नानुसारेणोत्तरं ददति)

प्रधानाचार्यः- अलमलं श्रृणुत-

प्रथमं युस्माभिरध्ययनावसरे सावधानैर्भाव्यम् । अवधानेन विना विद्या धर्तुं न शक्यते । गुरोः उपदेशवचनंच न बुध्यते । प्रत्येकं कर्मणि अवधानता आवश्यकी भवति, तत्रापि सर्वेषां कर्मणां मूलं विद्याऽस्तीति कारणाद् अत्र विद्यार्थिनामवधानता नितान्तम् आवश्यकी । बुद्धम् ?

वटुः- बुद्धम् आचार्य, विद्यायाम् अस्माकमवधानता अवश्यं भविष्यति ।

प्रधानाचार्यः- अपरः पालनीयो नियमो वर्तते- गुरुकुलमर्यादा । तत्र गुरुकुलं प्रविशद्भिर्विशेषतो ब्रह्मचर्यं पालनीयम् । भिक्षया, आशीर्वचनैर्वाऽनुग्रहीतुं गृहस्था मातरो भगिन्यो वा आगच्छेयुस्तदवसरे परिणीतासु मातृवद् अपरिणीतासु भगिनीवच्च

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यवहर्तव्यम्। तत्र कामदृष्टिर्नितरां निन्दनीया मन्यते। ब्रह्मचर्यपालनेन विद्या हृदये स्थिरा भवति। कामप्रवेशाद् विद्यायां रुचिर्नजायते। अधीता विद्याऽपि विस्मृता, अर्धविस्मृता वा भविष्यति। अतोगुरुकुलवासिभिरन्तेवासिभिर्ब्रह्मचर्यं सर्वथा पालनीयम्, नात्र उपेक्षाभावो वर्तनीयः। उक्तञ्च सुधीभिः- "ब्रह्मचर्येण तपसा देवा मृत्युमुपाघ्नत।" देवा ब्रह्मचर्यपालनस्य कारणादेव अमराः सञ्जाताः। भगवान् सदाशिवः पशुपतिर्ब्रह्मचर्यादेव मृत्युञ्जयोऽभवत्। व्यास-वत्स-वशिष्ठ-गालवविश्वामित्रप्रभृतयो ब्रह्मर्षयो ब्रह्मचर्यादेव दीर्घजीविनो मेधाविनः शक्तिमन्तश्च बभूवुः। अस्यां वंशपरम्परायां जातैरस्माभिरपि विद्यार्जनाय ब्रह्मचर्यं सर्वथा परिपालयितव्यम्।

वटुः- आचार्याः! अस्माभिः अध्ययनावधौ अवश्यं ब्रह्मचर्यं पालयिष्यते इति अत्र भवतो विश्वासयामः।

प्रधानाचार्यः- एवमेव अपेक्षितमस्माभिः। यूयं ब्रह्मचर्यस्य परिपालने सफला भवतेति आशीर्वचनं व्याहरामि। गुरुकुलमर्यादाया अपरः पक्षः उच्यते- स च पक्षोऽस्ति- प्रातर्ब्राह्ममुहूर्ते उत्थातव्यम्। सूर्योदयाद् घण्टाद्वयपूर्वमेव शय्यात्यक्तव्या। ब्राह्ममुहूर्तस्य निद्रा पुण्यक्षयकारिणी, आलस्यवर्धिनी च भवति। उत्थाय भूमिवन्दनं विधातव्यम्। त्रिराचम्य शिखावन्धनपुरस्सरं प्राणयाम-गायत्रीजपपूर्वकं सन्ध्या विधातव्या। सन्ध्यायां गायत्रीजपः प्रधानो मन्यते। गायत्र्याश्चतुर्विंशत्याम् अक्षरेषु चतुर्विंशतिर्देवताः सन्ति। गायत्रीं जपता जनेन चतुर्विंशत्या एव देवानामाराधना विधीयते। सध्याकालश्चप्रातः सूर्योदयात् सायं सूर्यास्तमनाच्च प्राग् उत्तमो मन्यते। उक्तञ्च महर्षिभिः -

उत्तमा तारकोपेता मध्यमा लुप्ततारका।
अधमा सूर्यसहिता प्रातः सन्ध्या त्रिधा मता॥
उत्तमा सूर्यसहिता मध्यमा लुप्तसूर्यका।
अधमा तारकोपेता सायं सन्ध्या त्रिधामता॥

सन्ध्याविधिः गुरुकुलीयोच्चमाध्यमिकविद्यालयेन पुस्तकाकारतया प्रकाशितोऽस्ति। एतदाधारेण सन्ध्याचरणं विधातव्यम्। सन्ध्यायां गायत्र्यासह भगवान् सूर्यः प्रधानतया आराध्यते। भगवान् सूर्यः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थावरजङ्गमजगतः प्राणभूतः आत्मा वर्तते। - (नभो विलोकयन् वक्ति)- भो बटवः प्रतीच्याम् अस्तं गच्छन्नस्ति दिनकरः। अमुं प्रणमत। एष हि-

चैतन्यहीनमिव सुप्तममुं हि लोकं
दृष्टिं प्रदाय निजकर्मसु सम्प्रयुंक्ते।
मार्तण्ड एष जगतः परिपूरकोऽस्ति
को वा विना दिनकृता गतिमादधाति॥

(नेपथ्ये)

भो परिचारक ! अधुनास्तं गच्छन्नस्ति रविः, तत् चरणस्थलादाह्वियन्तां गावः। गुरवो बटवश्च सन्ध्याचरणं विदधति। आसनजलपात्रादीनि सज्जीक्रियन्ताम्।

प्रधानाचार्यः- बटवः ! उपदेशक्रमः पश्चाद् चलिष्यति। अधुना सन्ध्याक्रियायै चलत। अहञ्चयामि।

बटवः- एवं क्रियते। (सर्वे उत्थाय यान्ति)

(इति निष्क्रान्ताः सर्वे)

॥ इति प्रथमोऽङ्कः॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयोऽङ्कः

परिचारकः अहो समयो विलम्बितः। रात्रौ निद्रावशगस्त्वरितं नाबुद्ध्ये। अरूणोदयः समाप्तप्रायो दृश्यते। नवोढा वधूरिव सलज्जा लोहितवर्णा प्राकृतिकश्रृङ्गारपूर्णा पूर्वादिक्। तथा हि-

रक्तो रविर्मधुरतादिगुणैर्नु प्राच्याः
प्राची च दातृगुणतोऽस्ति रवौ सुरक्ता।
शिष्यो यथा गुरुमवाप्य विशेषविज्ञं
संमोदते गुरुवरश्च सुशीलशिष्यात्॥ (नेपथ्ये)

भो परिचारक ! कुत्राऽसि। शीघ्रंगुरुवराणां बटूनाञ्च प्रातः कालिककृत्यसम्पादनाय आवश्यकसामग्रीं सज्जीकुरूत। अहं गोभ्यः घासपेयादिकं वितरामि।

परिचारकः- (आत्मगतम्) परिचारिका देवदत्ता प्रातःकालिकृत्यसम्पादनाय माम् आहूवयति। भवतु गच्छामि। (प्रकाशम्) हला देवदत्ते एषोऽहमागच्छामि सामायिककार्यपूरणाय।

(इति निष्क्रान्तः)

(ततः प्रविशति प्रधानाचार्यः पुस्तककरस्थः)

प्रधानाचार्यः- (आत्मगतम्) आदित्य इदानीं मध्येगगनं प्रकाशते। सम्प्रति अन्तेवासिनः समापितप्रातःकृत्याः स्युः। आहूवयामि तावत्। (प्रकाशम्) भो वत्साः, भो अन्तेवासिनः ! इत आयात।

वटवः- (श्रुतमभिनीय) एते वयमागता एव।

(इति प्रयान्ति।)

(ततः प्रविशन्ति परिहितधौतकञ्चुका नवा बटवः) (आगमनमभिनीय) भो आचार्य ! एते वयं प्राप्ताः।

प्रधानाचार्यः- (स्थलं निर्दिश्य) वसत। किञ्चिदहमुपदिशामि। तत्पूर्वं संध्यावन्दनपुस्तकं दर्शयामि। पुस्तकेऽस्मिन् प्रातःसायङ्कालयोः विधातव्यो संध्यावन्दनविधिः प्रकाशितोऽस्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुस्तकमेतद् गृहीत्वा वा पुस्तके लिखितं विषयवस्तु प्रतिलिपितया उत्तार्य एतदनुसारेणवत्सैः संस्कारकर्म विधातव्यम्। अवकाशदिवसं विहाय अन्येषु दिवसेषु संक्षिप्तं सन्ध्याकर्म विधातव्यम्, तदत्र निर्दिष्टमस्ति।

वटुः- आचार्य ! अस्माभिः गुरुकुलीयपद्धतेरनुसारेणैव सन्ध्याकर्म विधीयते।

प्रधानाचार्यः- भो वत्साः शिक्षार्जनाय यूयं गुरुकुलमायाताः स्थ। स्वागतं वः। प्रथमतोयुस्माभिरवध्येया महत्वपूर्णा शिक्षा उच्यते। श्रृणुत-

वटुः- अवहिताः स्म। (तारस्वरेण वक्ति)

प्रधानाचार्यः- सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः।

प्रथमवटुः- आचार्यवर ! सत्यमिति किम् ? कथं तत् परिभाष्यते ?

प्रधानाचार्यः- सत्यमिति सते हितम्। यत् स्थायि हितकारि च भवति तत् सत्यम्। सत्यमिति निश्छलता, यत्र छलदम्भादयो न तत् सत्यम्। यत्र सर्वहितकारिता, तत् सत्यम्। वत्स ! सत्यं सर्वतोभावेनाचरणीयम्। सत्यपालनेन इह परत्र च कीर्तिः प्रसरति। सत्यपालको जनः सज्जन इति कथ्यते। सज्जनस्य सर्वत्रादरो भवति। ईश्वरोऽपि सत्यरुप एव। राजर्षिर्हरिश्चन्द्रः सत्यवादितायाः कारणादेव पुण्यलोकमवाप। राज्ञो युधिष्ठिरस्य कीर्तिरधुनाऽपि श्रूयते। अत्र कारणं सत्याचरणमेव, सत्यवादितैव।

सर्वे अन्तेवासिनः-(सामूहिकस्वरेण) अवगतम् आचार्यवर ! एते वयं सत्याचरणाय प्रतिजानीमहे।

प्रधानाचार्यः- सत्याचरणाय सफला भवत। परमेतज्जानीत यत् सत्याचरणं महत् कठिनं भवति। एतद् विपुलं तप एव। सत्याचरणस्य मार्गः कण्टकपूर्णोऽस्ति, कोशलाधीशेन रामेण, राजर्षिभ्यां हरिश्चन्द्रयुधिष्ठिराभ्यां च सत्यपालनावसरे अधिकाधिकं काठिन्यमनुभूतं परं तैः दुःखजाले आपतितेऽपि सत्याचरणं जातु न त्यक्तम्। अत एव ते महान्तः सम्भूताः। कार्यवधौ युस्मास्वपि बहुविधानि काठिन्यानि कथं नापतेयुः , प्राणा अपि कथं न गच्छेयुः परं वत्सैः सत्याचरणं न त्यक्तव्यम्।

वटुः- न त्यज्यते आचार्यवर ! असह्यायां कठिनतायां प्राप्तायामपि सत्यमुच्यते सत्यमाचर्यते च।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रधानाचार्यः- एतदेव आशास्ते अन्तेवासिभ्य एष गुरुः।

द्वितीयोऽन्तेवासी- आचार्यवर ! धर्म इति किम् ? कथमेष आचरणीयः?

प्रधानाचार्यः- धियते इति धर्मः। धर्म इति धरणीयं कर्म। कर्तव्यमेव धर्मः, विवेक एव धर्मः। धर्म इति व्यक्तेर्वस्तुनो वा स्वाभाविको गुणः। यथा च जलस्य धर्मः शैत्यं मधुरता, तृप्तिदायिता चेत्यादयः। अग्नेर्धर्मः उष्णता, प्रकाशकताच। मानवस्य धर्मा अपि दयाप्रेमसहिष्णुता-सरलादयः। मानवतैव मानवस्य धर्मः। न्यायपरायणतैव धर्मः। सच्चरित्रतैव धर्मः। धर्मपालनेन विना कस्यापि व्यवहारो साधुतया न चलति। राष्ट्रस्य संविधानमपि धर्माचरणस्य नियमावलिर्वर्तते। सर्वे विधयो धर्मस्यैव अवान्तररुपाणि। स्मृतिकारोमनुराह- वेदप्रणिहितोधर्मः। वेदा यत् कथयन्ति तदनुकूलाचरणं धर्मो मन्यते, तद्विपरीतता अधर्म इत्युच्यते।

सर्वे अन्तेवासिनः- ज्ञातम्, आचार्यवर ! ज्ञातमस्माभिः।

प्रधानाचार्यः- अधर्मो जीवने जातुचिद् नावलम्व्यते इति प्रतिज्ञां कुरूत।

अन्तेवासिनः- एतद् प्रतिजानीमहे यद् यस्यां कस्यां दुःस्थितावपि धर्मो न त्यज्यते।

प्रधानाचार्यः- साधु वत्साः साधु। भगवान् भूतनाथः युस्मान् प्रतिज्ञापालनाय सक्षमान् विदधातु।

अन्तेवासिनः- आचार्यवर ! स्वाध्याय इति किम्?

प्रधानाचार्यः- स्वाध्याय इति शास्त्राध्ययनम्। वेदाध्ययनमेव स्वाध्यायः। सच्छास्त्रस्य अध्ययनं स्वाध्याय इति मन्तव्यम्। विशेषत आध्यात्मिकशास्त्रस्य अध्ययनं स्वाध्यायपदेन बोद्धव्यम्। नियमपूर्वकं सस्वरमुच्चारितः स्वशाखाया वेदपाठः, उपनिषदाम्, धर्मशास्त्रस्य तथा वेदाङ्गानां, पुराणेतिहासानाम् अध्ययनमपि स्वाध्याय एवेति जानीत। (अङ्गुलिनिर्देशनपूर्वकम्) स्वाध्याये न प्रमदितव्यम्। आलस्येन, अन्यहेतुभिर्वा स्वाध्यायो न छेत्तव्यः। अत्र प्रमादता सर्वथा गर्हणीया। स्वाध्यायस्य अपरिपालनेन शास्त्रज्ञानं लुप्यति। शास्त्राज्ञानाऽभावे कर्तव्याकर्तव्यबोधो न जायते। ततः सर्वं नश्यति, कार्यजातं वा विकृतायते। अतश्छात्रैः स्वाध्यायान्नप्रमदितव्यम्। एष एव वेदस्याशयो वर्तते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्तेवासिनः- आचार्यवर ! स्वाध्याये प्रमादिभिर्नभूयतेऽस्माभिः। एतत् प्रतिजानीमहे।

प्रधानाचार्यः- वत्साः एतदेव अस्माभिरपेक्षितम्। युस्माकं प्रतिज्ञया मम मनसि शान्तिर्वर्धमानाऽऽस्ते।

वटुः- भगवन् ! अनुगृहीताः स्म।

प्रधानाचार्यः- स्वस्ति भूयात्। (नेपथ्ये घण्टावादनं श्रूयते)

वटुः- अनुगृहीताः स्म।

प्रधानाचार्यः- पूर्वाह्नकालिको भोजनसमयः संभूत इत्यनुमीयते। मध्याह्ने पुनः शिक्षायै मेलिष्यामः। चलत।

वटुः- एवमस्तु। साधयामो वयम्। (इति निष्क्रामन्ति)

नेपथ्ये (ईशप्रार्थना श्रूयते)

परिचारकः- (प्रविश्य) (तारस्वरेण आह्वयति) इत आयाहि देवदत्तेः

देवदत्ता- भद्रमुख एषाऽहमायाता।

परिचारकः- साम्प्रतमीशप्रार्थनां विधाय आचार्यो बटवश्च भुञ्जानाः सन्ति। भोजनस्य असमाप्तिं यावद् वयं स्वतन्त्राः स्म। गावो बुभुक्षिताः पिपासिताश्च स्युरेतासां घासजलव्यवस्थां सम्पादयाव।

देवदत्ता- एवं करवाव।

(इति निष्क्रान्तौ)

(ततो बटुद्वयस्य प्रवेशः)

धन्यं गुरुकुलम्। धन्या आचार्याः। यदि गुरुकुलं न स्यात् तर्हि अल्पवित्ता वयं पठितुं कुत्र प्राप्नुयाम। केवलं पठनपाठनमेवात्र न विधीयते, परं सदाचारश्च शिक्ष्यते।

प्रथमः सखे ! कीदृशः सदाचारः शिक्ष्यते ?

द्वितीयः- सखेश्याम ! त्वं न जानासि किम्? पश्य -प्रातः ब्राह्ममुहूर्ते उत्थीयते, सन्ध्याजपध्यानादीनि नित्यकर्माणि सूर्योदयात् पूर्वमेव समाप्यन्ते। एतेन शरीरे मनसि च स्फूर्तिरायाति। ईशे भक्तिश्च वर्धते।

प्रथमः- केवलम् एतदेव ?

द्वितीयः- अपरञ्च श्रृणु- सत्यमुच्यते। सत्यं व्यवह्रियते। विद्यायामेव दत्तचेतोभिर्भूयते। दुस्सङ्गदोषाद् बहिर्भूयते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथमः- न केवलमेतन्मात्रम्, कवितालेखने, वादविवादप्रतियोगितायां, वक्तृत्वकलायां, प्रश्नोत्तरप्रतियोगितायाञ्च यथावसरं सहभागिभिर्भूयते। सर्वमेतद् अस्माकं बुद्धिवर्धनाय गुरुभिर्व्यवस्थापितमस्ति।

द्वितीयः- सत्यमुक्तं भवता। शिष्यान् सर्वथा योग्यान् कारयितुं गुरुवरा अहर्निशं दत्तचेतसः सन्ति। एभिः शिक्षाप्रदानेनास्माकं विवेकचक्षुरूद्घाटितं वर्तते।

उभौ- (युगपद् गुरुमहत्त्वं गायतः)

श्रव्ये दृश्ये च काव्ये सततमिह प्रयासं विधायैव शीघ्रं
शिष्या दक्षा भवेयुः कथमिह पठने लेखने वाचने च।
छात्राणामेवमेवं हितमिह विविधं सर्वदा चिन्तयन्तो
लग्ना लोकोपकारे रविरिव गुरवः सन्ति धन्याश्च मान्याः॥

(नेपथ्ये)

भो बटव ! उपाध्यायाः सभाकक्षे प्राप्ताः सन्ति। द्रुतं प्रयात।

बटुद्वयम्- अवसरोऽसौ उपाध्यायसन्निधेर्लाभप्राप्तेः, तच्छीघ्रं गच्छाव।

(इति निष्क्रान्तौ)

(सभाकक्षे कतिचन् विषयनिष्णाता उपाध्यायाः सन्ति)

बटवः (प्रविश्य)- एते वयं शिष्या आचार्यवरान् अभिवादयामहे।

प्रधानाचार्यसहिता उपाध्यायाः- आयुष्मन्तो भवत वत्साः।

वटवः- अनुगृहीताः स्म।

प्रधानाचार्यः- वत्सा यूयं नवप्रवेशिनः स्थ। अत इदानीं काँश्चन विषयान् स्मारयितुम् आहूताः स्थ।

वटवः- आचार्य ! अवहिताः स्म।

प्रधानाचार्यः- प्रथमतो युस्माभिर्यथासमयं कक्षाकोष्ठे प्रवेष्टव्यम्। तत्र दत्तावधानैर्भूत्वा पाठिताः पाठाः श्रवणीयाः। परस्परं स्वल्पीयानपि वार्तालापः सह्यो न भवति। वार्तालापकारी, अनुशासनविरोधीति मत्वा दण्ड्यते। तथाविधश्छात्रः पाठितान् पाठान् बोद्धुं न पारयति। यः पाठान् बोद्धुं पारयति सः दिवा पाठितान् पाठान् दिवसस्य अवकाशवेलायां वा रात्रौ शयनात् प्राग् अन्यान् सहपाठिनः बोधयतु। पाठ्यविषये परस्परं विमर्शनं विधातव्यम्। तथा सति पाठ्यविषयस्य ज्ञानात् कोऽपि वञ्चितो न भवति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वटुः- प्रधानाचार्य ! एवमेव क्रियते ।

प्रधानाचार्यः- अपरञ्च- कक्षातालिकां निर्माय पाठाः पठनीयाः । गुरुभिः पृष्टाः प्रश्नाः उत्तरणीयाश्च । यथासमयं पठितव्यम्, यथासमयं भोक्तव्यम् । यथासमयं शयितव्यञ्च ।

वटुः- प्रधानाचार्य! एतदनुशासनमस्माभिः परिपाल्यते ।

प्रधानाचार्यः- एतदेव आशासे वत्साः ।

अन्ये उपाध्यायाः- वत्साः !अस्माभिः पाठितेषु विषयेषु यत्र यत्र सन्देहो जायते तद् पाठनावधौ अन्यत्र समये च पृष्ट्वा यूयं बोद्धुं शक्नुत । तत्र वयं बोधनाय तत्पराः स्म एव ।

वटुः- एवमेव क्रियते उपाध्यायाः ।

योगगुरुः- शरीरस्य रक्षायै, मनस एकाग्रतायै च योगस्य महन्महत्वं वर्तते । प्रतिदिनं नित्यक्रियायाः समाप्तेः पश्चाद् अष्टवादनाद् अर्धघण्टां यावद् विद्यालयपरिसरे योगकक्षा प्रचलति । तत्र अवश्यमेव वत्सैः, सहभागिभिर्भवितव्यम् । तत्र विशेषतः आसन-ध्यान-प्राणायामानां महङ्त्वं, प्रकाश्यते । अभ्यासश्च कार्यते ।

वटुः- योगगुरो ! योगकक्षायाम् अस्माभिर्नित्यं सहभागिभिर्भूयते ।

क्रीडागुरुः- सर्वदा स्वास्थ्यस्य वर्धनाय, शरीरस्य स्फूर्त्यै च क्रीडा आवश्यकी भवति । हस्तकन्दुक-पदकन्दुक-कूर्दनोत्प्लवनसदृशीषु क्रीडास्वपि यथारूचि युस्माकं सहभागिता आवश्यकी भवति । क्रीडाविशेषस्य नियमा अपि ज्ञातव्याः, क्रीडाश्च अभ्यसनीयाः ।

वटुः- गुरो ! वयं यथासमयं क्रीडिष्यामः ।

(प्रविश्य)

परिचारकः- आचार्यवर ! कतिचन उदारमनसो गृहस्था खाद्यजातमूढ्वा विद्यालयस्य अभ्यन्तरे आगताः, अत्रभवन्तं प्रतीक्षन्ते ।

प्रधानाचार्यः- गृहस्थान् सादरं प्रतीक्षालये निवेशय । अहमधुनैव मिलामि ।

परिचारकः- यदाज्ञापयति आचार्यः ।

(निष्क्रामति)

प्रधानाचार्यः- वत्साः ! अत्र अन्ये गुरवो युस्मान्नुपदिशन्ति । अहमुदारमनसः आगन्तुकान् सभाजयामि ।

(इति निष्क्रामति)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(ततः प्रविशन्ति तण्डुलपोटलिकाः, व्यञ्जनकण्डोलान्, सूपजातञ्च ऊढ्वा उदारमनसो गृहस्थाः)

गृहस्थः- आचार्यवर ! यत् किञ्चिदशनजातमुपहर्तुकामाः स्म ।

प्रधानाचार्यः-अस्मद्धिताय भवद्भिर्यत् कृतं तदुत्तमम् । भवतामनुग्रहेणैव गुरुकुलवासिनां शरीरयात्रा चलति । ब्रह्मचारिणां वानप्रस्थिनां सन्यासिनामपि आश्रयस्थलं गृहस्थाश्रम एव । विद्यार्थिनः, शिक्षकाः, प्रशासकाः, योद्धारो, नेतारोऽभिनेतारः, राजर्षयो महर्षयश्चेति सर्वे एव गृहस्थाश्रमात् संभूताः । अथ च सर्वेषामुदरपूर्तिः गृहस्थाश्रमादेव संभवतीति हेतोः गृहस्था भवन्तः सातिशयं धन्याः सन्त्येव ।

गृहस्थः- एतद् अत्रभवतामाचार्यवराणां सौजन्यम् । विद्यामन्दिरस्य, विद्याविचक्षणानाम् अत्रभवताञ्च दर्शनेच्छया वयमत्रागताः । आनीतं न किमपि, केवलं रिक्तोहस्तो न गच्छेत् राजानं भिषजं गुरुमिति प्रचलित मर्यादा पालितैव ।

प्रधानाचार्यः- नैवं कथनीयं यतः-

विद्यामन्दिर-देवसद्मजनतावासान् पथो विस्तृतान्
शिल्पोद्योगप्रशासनानि च भृशं निर्मान्ति भूपा यतः ।
नेतारः कुशलास्तथा नयविदः शूरा भटाः कर्मिणो
गार्हस्थाश्रमतो मिलन्ति तदहो धन्या गृहस्थाः किल ॥

अपरञ्च-

भैक्ष्यं पेयमथो निवासभवनं वृत्तिं गुरोर्वेतनं
छात्राँश्चैव समुत्सुकान् गुरुकुलं प्राप्नोति नित्यं यतः ।
यस्मिन् राज्यमिदं सुरर्षिपितरः पूजां लभन्तेऽनिशं
तद् गार्हस्थ्यमहो चिरं विजयते भूमौ जनैरादृतम् ॥

गृहस्थः- अनुगृहीताः स्म प्रधानाचार्याणाम् एवमाशीर्वचनैः । समये समये एवं प्रकारेण मेलितुं कामयामहे ।

प्रधानाचार्यः- सर्वदैव अभ्यर्थ्यते भवतामागमनम् ।

गृहस्थः- (नमस्कृत्य) साधयामो वयमधुना ।

(इति निष्क्रान्ताः सर्वे)

॥ इति द्वितीयोऽङ्कः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ तृतीयोऽङ्कः

(तत प्रविशतः परिचारकः, परिचारिका च)

परिचारकः- प्रवचनाय प्रार्थित एतद्देशस्यैव प्रतिष्ठित आचार्यो विशिष्टातिथिर्भूत्वा अस्मद्विद्यालयेऽद्य समायाति। एतस्य, अन्येषामागन्तुकानाम् अभिभावकानाञ्च स्वागताय मञ्चसज्जायै निर्दिष्टोऽस्मि।

परिचारिका- अहमपि अतिथिवर्येभ्यः अर्पयितुम् उद्यानीयपुष्पाणां मालाग्रथनाय द्वारकलशयोः जलपूरणाय च प्रधानाचार्येण निर्दिष्टाऽस्मि।

परिचारकः- तर्हि निर्देशनं प्रपूरयाव।

॥ इति निष्क्रान्तौ ॥

(ततः अतिथयः, प्रधानाचार्यः, गुरवो विद्यालयव्यवस्थापनसमितेः अध्यक्षः सदस्याश्च, कतिचन छात्रा अभिभावकाश्च प्रविशन्ति। तत्र कतिचित् मञ्चोपरि विराजन्ते च।)

प्रधानाचार्यः- अस्मन्निमन्त्रणं स्वीकृत्य उपस्थितान् विशिष्टातिथीन्, गुरुन्, विद्यालयव्यवस्थापनसमितेरध्यक्षं सदस्यांश्च, अभिभावकान् छात्रांश्च गुरुकुलविद्यालयस्य पक्षतः स्वागतं व्याहरामि। अत्रभवतां सद्भावेन स्नेहेन च विद्यालयोऽसौ प्रगतिपथम् अनुसरन्नासीति विनिवेदयामि। अतः परं विशिष्टातिथीन् प्रेरकोपदेशप्रदानेन अनुग्रहीतुम् अनुरूणद्मि। -

विशिष्टातिथिः- समादरणीयाः प्राचार्याः, आदरणीया गुरवः, स्नेहास्पदा छात्राः, उपस्थिता भद्रपुरूषाः परिचारकवर्गाश्च।

सम्प्रति अहं ज्ञानोपार्जनाय समर्पितानाम् छात्राणां कर्तव्यविषये किञ्चिद् वच्मि।

भो वत्साः यस्मिन् कस्मिन्नपि कर्मणि स्वाध्यायप्रवचने न त्यक्तव्ये। शास्त्रस्य निर्देशनमस्ति- "ऋतञ्च स्वाध्यायप्रवचने च।" अस्याशयो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वर्तते- सत्यभाषणेन सह स्वाध्यायप्रवचने अपि पालनीये। "दमश्च स्वाध्यायप्रवचने च" इन्द्रियाणां निग्रहोऽपि भवतु, स्वाध्यायप्रवचने च चलताम्। "शमश्च स्वाध्यायप्रवचने च" अस्याभिप्राय एवमस्ति- अन्तरिन्द्रियाणां बुद्ध्यहंङ्कारमनसां निग्रहोऽपि भवतु, स्वाध्यायप्रवचने च चलताम्। "अतिथयश्च स्वाध्यायप्रवचने च" अस्याभिप्रायः- अतिथिसत्कारोऽपि भवतु, स्वाध्यायप्रवचने च विधातव्ये।

स्वाध्यायः, प्रवचनञ्च समेषां कृते परमम् अनुशासनं वर्तते। छात्रावस्थायाः पश्चाद् गृहस्थावस्थायामपि स्वाध्यायः प्रवचनञ्च न त्यक्तव्ये। स्वाध्यायपदेन स्वशाखायाः वेदाध्ययनेन सहैव वेदाङ्गानामन्येषाम् आत्मोन्नतिकारकाणां शास्त्राणाञ्च अध्ययनमिति बोद्धव्यम्। न केवलं शास्त्राध्ययनं परमधीतज्ञानस्य प्रचारणमपि आवश्यकं भवति। एतदर्थम् उपनिषदि स्वाध्यायेन सहैव प्रवचनपदमपि उल्लिखितं वर्तते। स्वाध्यायादेव अतिथिसत्कारस्य, अग्निहोत्रस्य, समाजसेवायाः, अनाथानां सहायतायाः, देवपूजायाः पितृसेवायाः, तपश्चर्यायाः, अधर्मस्वरुपस्य, अज्ञानतायाश्च सम्बन्धे बोधो जायते। मानवैर्जीवने किं किं कार्यं, किं किञ्च त्याज्यमिति स्वाध्यायाज्ज्ञायते। अतः स्वाध्यायः कठिनातिकठिनावस्थायामपि न त्यक्तव्यः।

अपरञ्च स्वाध्यायेन सह प्रवचनमपि विधातव्यम्। प्रवचनात् स्वाध्यायस्य अभ्यासो भवत्येव, तेन सहैव अन्येऽपि स्वाध्यायस्य महत्वं बोद्धुं पारयन्ति। जीवनोपयोगि तथ्यं बोद्धुञ्च प्रभवन्ति। स्वाध्यायस्य लाभो न केवलम् अध्येत्रा परं श्रोतृभिरपि प्राप्यते। येन वक्तुर्यशः प्रसरति, वाक्कौशलञ्च वर्धते। सर्वसाधारणजनानाम् उपकारश्च जायते। अतः आश्रमाद् आश्रमे प्राप्तेऽपि स्वाध्यायप्रवचने न त्यक्तव्ये। भो वत्साः ! अन्तेवासिनः। यावज्जीवमधीते नियममवलम्ब्य एतस्य शरीरस्य असमाप्तिं यावत् स्वाध्यायं प्रवचनञ्च असकृच् चालयतः। एतदेवाद्रहं कामये, अनुरून्धे च। ॐ शान्तिः, ॐशान्तिः, ॐशान्तिः।

(तुमुलः करतलध्वनिः प्रसरति)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अध्यक्षः- (सभापतिः विद्यालयव्यवस्थापनसमितिः)

अस्यां महिममण्डितायां सभायामस्मद्निमन्त्रणं स्वीकृत्य, उपस्थाय च गुरुकुलीयच्छात्राणाम् उज्ज्वलभविष्यस्य कामनया उपदेशदातॄन् विशिष्टातिथीन्, प्राचार्यसहितान् गुरुवरान् अन्याँश्च कृतज्ञताम् अभिव्यनज्मि । गुरुकुलीयविद्यालयस्यैवंविधैःकार्यक्रमैः, व्यवस्थापनसमितेः अध्यक्षसदस्याः वयं प्रभाविताः स्म । एवंप्रकारकाः कार्यक्रमा विद्यालये चलन्तु । अत्र व्यवस्थापनसमितिरेषा यथाशक्यं सहयोगं विधास्यत्येवेति विनिवेदयामि ।

(इत्युक्त्वा विरमति)

प्रधानाचार्यः- अधुना विद्यालयपक्षत आयोज्यमानं तौर्यत्रिकममवलोकयितुं प्रार्थये । (ततः मञ्चस्यैकस्मिन् भागे छात्रचतुष्टयं नृत्यगीतप्रस्तुत्यै उपतिष्ठते । वाद्यवादका वाद्यवादनं प्रस्तुवन्ति ।

वटवो गायनं प्रस्तुवन्तिः-

वटवः- संस्कृतभाषा प्राचीनतमा सर्वासां जननी ।
भाषायामस्यां नवीनज्ञानानि सन्ति बहूनि ॥
मानवजनिः सफलायते संस्कृतभाषातः ।
अध्यात्मविद्या, नैतिकशिक्षा प्राप्यते बहुत्र ॥

ऋषिभिर्दिव्यं वैदिकज्ञानं संस्कृते विन्यस्तम् ।
समाजसेवां सततं कर्तुं सर्वत्र निर्दिष्टम् ॥
किञ्चास्ति सत्यं किञ्च भो मृषा किं कार्यं मनुष्यैः ।
विबोद्धुमेतत् संस्कृतभाषा प्रपठ्या समस्तैः ॥
भो राष्ट्रभक्ता भो जिज्ञासवः संस्कृतं पठ्यताम् ।
जीवनोद्देश्यं सफलीकृत्य समाजे रमन्ताम् ॥
जीवनोद्देश्यं सफलीकृत्य समाजे रमन्ताम् ॥

समाजे रमन्ताम् ।

(करतलध्वनिः मुहुर्मुहुः प्रसरति)

पुनः एकवारं पुनः एकवारमिति ध्वनयः सभामध्यतः प्रसरति ।

(इति निष्क्रान्ताः सर्वे)

॥ इति तृतीयोऽङ्कः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ अथ चतुर्थोऽङ्कः ॥

(ततः प्रविशति परिचारको भद्रमुखः)

परिचारकः- सम्पादनीयं कार्यजातम् अधिकमेव अवशिष्टं वर्तते। फलपुष्पक्षुपेषु जलदानम्, कक्षाप्रकोष्ठानां परिमार्जनम्, विद्यालयपरिसरस्य शोधनञ्च विधातव्यानि सन्ति। भवतु देवदत्ताम् आह्वयामि। (आह्वयति) भो देवदत्ते इत आयाहि।

परिचारिका- भद्रमुख ! एषाहमायाता। कथय किं कार्यं करवाणि।

परिचारक- देवदत्ते ! संमार्जनप्रभृति कार्यजातम् अधिकमेवाऽऽस्ते, तद् सहैव कार्यं सम्पादयितुं भवती आहूता।

परिचारिका- भवत्येव। भवता, सह कार्यसम्पादनस्य अवसरं प्राप्यैषा मोमुद्यते।

परिचारकः (स्मितं हसति) (नेपथ्ये द्वारताडनध्वनिः श्रूयते)

परिचारकः- (निपुणं निरीक्ष्य) द्वारदेशे आगन्तुकाः आगताः इति विभावये, तद् गच्छामि। (प्रतिष्ठते)

(ततः परिचारकेण सहैवागन्तुकत्रयस्य प्रवेशः)

प्रथम आगन्तुकः- एष गुरुकुलोच्चमाध्यमिकविद्यालयः। कीदृशं स्वच्छं शान्तञ्च स्थलम्। विशालं प्राङ्गणम्, परितो दूर्वामण्डितं क्षेत्रम् एकत्र क्रीडाप्राङ्गणम्, अपरत्र शाकमूलकादिविविधव्यञ्जनभरिता वाटिका, इतरत्र गोशाला, यत्र घासं तोयञ्च जग्ध्वा पीत्वा च हृष्टपुष्टा गावः रोमन्थमभ्यस्यन्ति।

अधः पतितपावनी गङ्गा प्रवहति। उपरितनभूभागे सालतालतमालसरलादिभिः वनवीथी मनोहृलादिनी परिदृश्यते। विद्यार्थिनामध्ययनाय निर्मितानि कक्षा भवनानि अपि मनस्तापं हरन्ति। मध्येप्राङ्गणमवस्थितं भगवतो लोकशङ्करस्य शङ्करस्य विग्रहमण्डितं मन्दिरञ्च विद्यापीठशोभां द्विगुणीकरोति। अत्र विद्यामन्दिरे आगताश्छात्रा अवश्यं ज्ञानार्जनाय प्रभवन्ति। कीदृशः मनोहारी परिवेशोऽस्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीय आगन्तुकः- विद्यालयपरिसरे प्राकारनिकटे रोपिता वर्धिताः फलिताश्च आम्र-जम्बीर-नारङ्गदाडिमाक्षोटानां तरव आगन्तुकानां मनो लोभयन्ति। फलानां सौरभमूढ्वा चलितः पवनः सर्वान् नितरामानन्दयति। तनौ स्फूर्तिञ्च वर्धयति।

तृतीय आगन्तुकः- सत्यमुक्तम्, तपोवनमिव अवस्थितमेतद्, विद्यामन्दिरं सर्वान्नाकर्षति। पुष्पितानां विविधानां पुष्पाणां सौरभस्य मादकता अन्यैव।

प्रथमः आगन्तुकः- उचितमुक्तं भवता। तथाहि-

वाहं वाहं वहति पवनः पुष्पगन्धं समन्तात्
पायं पायं मधुरसमसौ याति पुष्पेषु भृङ्गः।
स्वादैर्माद्यन् चरति विपिने कोकिलः पल्लवानां
दृश्यञ्चैतद् मदयति मनो हन्त पान्थावलीनाम्॥

द्वितीय आगन्तुकः- अपरञ्च सखे श्रृणु-

शालास्ताला असनवकुलाः पिप्पलाः कोविदारा
आम्रा आम्रातकवटशमीबिल्वजम्बूकदम्बाः।
एते विद्यालयपरिसरे शाखिनो विद्यमाना
श्छायां पुष्पं फलमपि प्रदायैव नोऽभ्यर्थयन्ति।

तृतीय आगन्तुकः- सत्यम्, अनुपममेव पक्वफलसौन्दर्यम्। तथा च-

रम्भा रम्भातनुरिव रूचाऽऽकर्षणं संविधत्ते
धात्री धात्री किमु खलु फलैस्तोषयत्येव पान्थान्।
एवं नारङ्गकप्रभृतयः स्वादधारां वहन्तो
बालान् वृद्धानथ च तरूणान् सर्वथाऽऽकर्षयन्ति॥

(आगन्तुका विद्यापीठसौन्दर्यं वीक्ष्य सम्मुह्यन्ति।)

परिचारकः (हस्ताताडनेन ध्यानम् स्वस्मिन् आवर्जयति) भवतां विद्यापीठे आगमनस्य हेतुम् ज्ञातुमिच्छामि।

(आगन्तुका) अस्य गुरुकुलविद्यालयस्य नाम बहुधा श्रुतम्। अत्रत्यां वस्तुस्थितिं बोद्धुमागताः स्म। कथमेतद् विज्ञायते ?॥

परिचारकः- अहं प्रधानाचार्यं विनिवेदयामि। असौ भवतां जिज्ञासां समाधास्यति। भवन्तोस्यामतिथिशालायां प्रतीक्षन्ताम्। (निष्क्रामति) (आगन्तुका तूष्णीं तिष्ठन्ति)।

(ततः प्रविशति प्रधानाचार्यः, तदनु प्रधानाचार्य आगन्तुकाश्च मिथः प्रणमन्ति।)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रधानाचार्यः- स्वागतं वः । कथ्यतां तावद् भवद्भिः गुरुकुलविद्यालयतः कीदृशी सेवा अपेक्षिता ?

आगन्तुकः- (किञ्चिदवनम्य) भो गुरुवर !पठनपाठने एतस्य गुरुकुलविद्यालयस्य प्रसृतं नाम श्रुत्वा आगताः स्म । कथमसौगुरुकुलविद्यालयः सञ्चालितइति ज्ञातुमिच्छामः ।

प्रधानाचार्यः- श्रूयताम् । अत्र सर्वे पठितुं प्राप्नुवन्ति । संस्कृतभाषया सह आङ्गलभाषा, भाषाविज्ञानम्, अनिवार्यम् अङ्कगणितम्, वैकल्पिकम् अङ्कगणितञ्च अत्र पाठ्यन्ते । योगाभ्यासश्च कार्यते महिलाच्छात्राणां कृते पृथग् आवासगृहञ्च वर्तते ।

आगन्तुकः- तर्हि अन्यविद्यालयानां विद्यार्थिभिस्सह एतद्विद्यालयस्य विद्यार्थिनो योग्यतायां न्यूना न भवन्ति ।

प्रधानाचार्यः- एवम् । यथासम्भवं सर्वेषु क्षेत्रेषु विद्यार्थिनः प्रवेष्टुं शक्नुवन्तु इत्यस्माकं विचारोऽस्ति ।

आगन्तुकः- वयं जनपदत्रयस्य आगन्तुकाः स्म । अतो गत्वा स्वस्वजनपदे गुरुकुलविद्यालयं सञ्चालयितुमिच्छामः ।

प्रधानाचार्यः- एष प्रमोदस्य विषयः । मूलतो जनतायाः सहयोगेन गुरुकुलविद्यालयः सञ्चलति । तत्र जनता मुष्टिदानम्, वित्तदानं, भूमिदानं वा कर्तुं शक्नोति । एतदतिरिक्तं सङ्घीयसर्वकारस्य, प्रदेशसर्वकारस्य, स्थानीयसर्वकारस्य वा पक्षतोऽपि आवश्यकसहयोगो मेलितुं शक्यति ।

आगन्तुकः- साम्प्रतं गुरुकुलविद्यालयस्य सञ्चालनविषये बहुज्ञातम् । एतदनुसारेण गुरुकुलविद्यालयं सञ्चालयितुं प्रयतिष्यामहे । अधुना प्रस्थातुमिच्छामः । (अभिवादनमर्पयन्ति)

प्रधानाचार्यः- (अभिवादनं कृत्वा) गुरुकुलविद्यालयानां मध्ये यथावसरं विमर्शनं भवतु नाम ।

आगन्तुकः- एवमेव सम्पादयिष्यते । (प्रतिष्ठन्ते)

(इति निष्क्रान्ताः सर्वे)

॥ इति चतुर्थोऽङ्कः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ अथ पञ्चमोऽङ्कः ॥

(नेपथ्ये)

भो परिचारकाः श्रृणुत-

अद्य विद्यालये कविताप्रतियोगिता आयोज्यमानाऽस्तीति श्रुतमेव भवेत् । अतो युष्माभिः शीघ्रं मञ्चव्यवस्थापनं कर्तव्यम् ।

(ततः प्रविशतः परिचारकः परिचारिका च)

उभौ- प्रधानाचार्येण मंञ्चव्यवस्थायै आवां निर्दिष्टौ, तद् त्वरितं निर्दिष्टं कार्यं प्रपूरयाव ।

(इति निष्क्रान्तौ)

(ततः प्रविशन्ति प्रधानाचार्यः, उपाध्यायाश्छात्राश्च । प्रधानाचार्यः सभापतेः आसनमलङ्करोति ।) रामचन्द्रनामा छात्रः उद्घोषणमञ्चमेत्य कार्यक्रमविवरणं प्रस्तौति ।) (सभापतिवरणानन्तरम्)

रामचन्द्रशर्मा- (उद्घोषकःसप्रन्नः)

एतस्याः गरिममङ्गयाः सभायाः समादरणीयाः सभापतयः, नीरक्षीरविवेकिनो निर्णायकाः, समादृता उपाध्यायाः, सहाध्यायिनो वयस्याः, अन्या उपस्थिता भद्रव्यक्तयश्च । सर्वानहं छात्रपरिषदः पक्षतः प्रणमामि ।

अद्य कविताप्रतियोगितायाम् उत्कृष्टस्य कविताचतुष्टयस्य गायनाय रचनाकारान् आहूवयामि । तत्र प्रथमं गोपालप्रसादः स्वकविता गायति-गुरुकुलगौरवमिति ।

गोपालप्रसादः (गायति) -

धौतोत्तरीये परिधाय शुभ्रे
भालं विभूत्या परिकल्प्यशुभ्रम् ।
हस्ते गृहीत्वा पठनीयग्रन्थान्
प्रयाति बालोऽध्ययनीयकक्षम् ।
वेदव्याकरणज्यौतिषसांख्य-
योगतर्कप्रभृतीन् विषयान् वै ।
छात्रवर्गहितकामनयैष

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वक्ति विस्तृततया गुरुवर्गः ॥
पाठ्यांशपाठाय निरन्तरं रता
अध्यात्मबोधाय च दत्तचेतसः ॥
विद्यार्थिनां ज्ञानविवर्धनोत्सुकाः
सन्त्येव नूनं गुरवो महत्तराः ॥
(करतलवादनम्)

उद्घोषकः- अतः परं सरिता आचार्यः "संस्कृतमहङ्गवमि"ति कवितां गायति-

अनेकभाषाजननीति विश्रुता
श्रुतौ प्रसिद्धा मुनिवर्गसेविता ।
जनैः पुरा वाग्व्यवहारमार्गतः
समादृता देवगवी विराजते ॥
कथाविधायां कविताविधायां
श्रव्ये च दृश्ये नितरां प्रचारिता ।
धर्मार्थकामेषु च मोक्षमार्गे
जनान् नयन्ती जयतीह देववाक् ॥
सांख्ये तर्के योगवेदान्तक्षेत्रे
सङ्गीते वा तन्त्रसाहित्ययोश्च ।
दैवी वाणी प्रसृताऽस्ते बहुत्र
भाषा चैषा प्रसृता नैव कुत्र ?॥
(करतलवादनम्)

उद्घोषकः- सम्प्रति प्रसन्नचन्द्रशर्मा उपकारितानामधेयां कवितां गायति-

समाजाय प्राचेतसो रामगाथां
तथा व्यासदेवो ददौ ब्रह्मसूत्रम् ।
कथं लोकसेवा भवेच्चिन्तयन्तः
सदा सन्ति धन्या धरायां हि सन्तः ॥
इमे दर्शयित्वा नरान् नीतिमार्गं
निनीषन्ति धर्मे जनोत्थानकार्ये ।
महद् दुःखमूढ्वाऽपि लोकस्य तोषं
सदा चिन्तयन्तो जनाः सन्ति धन्याः ॥
दधीचिः स्वदेहं ददौ देवताभ्यः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिविः मांसखण्डान् कपोताय प्रादात् ।
जिनः पुत्रभार्येऽत्यजल्लोकभूत्यै
जनानां हितार्थं यतन्ते हि सन्तः ॥
(करतलवादनम्)

उद्घोषकः- अधुना ध्रुवप्रसादःदेशवन्दनेति कवितां गायति -

उमामहेशखेलितां
महर्षिसिद्धसेविताम्
तपस्स्थलीं शमस्थलीं
नमामि पर्वतस्थलीम् ॥

मिथो विभिन्नभाषिषु
तथा विभिन्नजातिषु ।
सुमेलभावभावितां
नमामि 'ने'धरामिमाम् ।

वियत्प्रमाणलम्बिभिः
सदैव शुभ्रमूर्तिभिः ।
हिमालयैर्मनोरमां
नमामि विश्वसम्पदम् ॥

रवीन्दुशोभिराष्ट्रियध्वजेन
स्वाभिमानिना
समुन्नतोत्तमाङ्किकां
नमामि वीरमातरम् ॥
(करतलवादनम्)

उपाध्यायः- (निर्णायकमण्डलस्थः) अस्यां कविताप्रतियोगितायां देशवन्दना-उपकारिता- संस्कृतमहङ्गवञ्चेति कविताः क्रमशः प्रथमद्वितीयतृतीयस्थानेषु तथा "गुरुकुलगौरवम्" कविता चतुर्थस्थानीयाचाभवन्निति सधन्यवादं उद्घोष्यते । कविताप्रतियोगितायाम् सहभागिनः अन्येऽपि साधुवादभाजः सन्ति । एवमेव निबन्धप्रतियोगितायाम्, अन्यविधे आन्तरिकक्रियाकलापे च भवद्भिः सहभागिभिर्भाव्यम् । तथा सति भवतां व्यक्तित्वविकासो भविष्यति ।

सभापतिः- प्रतियोगितायां सहभागिनः सर्वान् प्रशंसन् सभां विसर्जयति ।

(इति निष्क्रान्ताः सर्वे)

॥ इति पञ्चमोऽङ्कः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ अथ षष्ठोऽङ्कः ॥

(नेपथ्ये)

भो परिचारकाः ! अद्य गुरुकुलोच्चमाध्यमिकविद्यालये स्थित्वा अधीतशास्त्राणां छात्राणां प्रस्थापनस्य कार्यक्रमोऽस्ति। तद् मञ्चसज्जायै, उपहाराऽऽनयनाय च त्वरयत। (ततः परिचारकः परिचारिका च प्रविशतः) (कर्णं दत्त्वा)

उभौ- देवदत्ते ! आवां मञ्चसज्जायै निर्दिष्टौ आस्व, तद् विलम्बितमिव प्रतीयते, त्वरितं गच्छाव।

देवदत्ता- एवं गच्छाव। (इति निष्क्रान्तौ)

(ततः प्रविशन्ति प्रधानाचार्यः, उपाध्यायाः, कतिचन अभिभावकाः परिचारकवर्गाः छात्रसमूहाश्च)

प्रधानाचार्यः- एतस्मिन् गुरुकुलोच्चमाध्यमिकविद्यालये स्थित्वा भवद्भिः विद्यालयस्य मर्यादां परिपाल्य मनोयोगपूर्वकमधीतम्। अहमन्ये गुरवश्च सन्तुष्टाः स्म। यद्यपि भवन्तो विज्ञा एव, तथापि न्यूनवयसो वत्सान् स्मृत्वा किञ्चिद् वच्मि।-

तत्र प्रथमं सूत्रमस्ति- अधीतानि शास्त्राणि न विस्मर्तव्यानि। पुनः पुनः शास्त्राणाम् अभ्यासो विधातव्यः। कथितमेव विद्वद्भिः- आवृत्तिः सर्वशास्त्राणां बोधादपि गरीयसी।

वटुः- गुरुचरणाः शास्त्राभ्यासं करिष्यामः।

प्रधानाचार्यः- पुनः श्रूयताम्-

द्वितीयं सूत्रमस्ति- आचारपालनम्। आचारः सततं पालनीयः 'आचारहीनं न पुनन्ति वेदाः' इति वचनं श्रूयते। शिष्टा आदरणीयाः, अवराः स्नेहेन द्रष्टव्याः। देशहिताय, जनहिताय च सर्वदा तत्परैर्भाव्यम्। स्वार्थबुद्ध्या किमपि कार्यं न सम्पादनीयम्। तृतीयं सूत्रमस्ति-न्यायस्य रक्षायै, अन्यायस्य निर्मूलनाय च प्रयतनीयम्। यत्र अन्यायो भूत इति अन्तस्करणं प्रमाणयति तत्र विरोधो विधातव्यः। कथितञ्च- "न्यायात् पथः प्रविचलन्ति कथं न धीराः"

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चतुर्थं सूत्रमस्ति- संस्कृतभाषायाः, संस्कृते अन्तर्निहितस्य ज्ञानस्य च रक्षायै, संवर्धनाय च भवद्भिः निरन्तरं दत्तावधानैर्भाव्यम्। संस्कृतवाङ्मयस्य निर्देशनं परिपाल्य कार्याणि विधातव्यानि।

पञ्चमं सूत्रमस्ति- राष्ट्रियाभिलेखालयादिषु अवस्थितान् संस्कृतसम्बद्धग्रन्थान्- नेपालीभाषायाम् आङ्ग्लप्रभृतिषु भाषासु च अनूद्य स्वदेशे विदेशेषु च प्रचारो विधातव्यः। येन संस्कृते अन्तर्निहितं ज्ञानं सर्वे जानन्तु।

वटुः- गुरुवराः भावत्कं निर्देशनं शिरोधार्यं करिष्यामः।

(अत्रान्तरे कश्चन उपाध्यायोऽपि उपदिशति)

उपाध्यायः- जनजातीनाम्, दलितवर्गस्य, पश्चजातीयानाञ्च जनानां संस्कृते प्रवेशनाय प्रयतनीयम्। यतः संस्कृतभाषा सर्वेषां भाषाऽस्ति। केवलं ब्राह्मणवर्गस्य भाषेयमिति प्रवादः खण्डनीयः। वृत्तिव्यवस्थया, प्रचारमाध्यमेन वा तथाविधा व्यक्तयः आकर्षणीयाः। सर्वे पठन्तु संस्कृतम्, सर्वे जानन्तु संस्कृतमिति सम्राघोषः सर्वत्र प्रसरतु।

उपाध्यायः- (वेदगुरुः) भो वत्साः! श्रृणुत-

संस्कृतस्य शिक्षणाय, साप्ताहिकं, मासिकं वा संस्कृतसम्भाषणशिविरं स्थाने स्थाने समायोजनीयम्। सरलसंस्कृतभाषायां लघुशिक्षणपुस्तकानि निर्माय प्रचारणीयम्। येन संस्कृतशिक्षणं कठिनं नास्तीति सन्देशः सर्वत्र प्रवाहितः स्यात्।

उपाध्यायः- (व्याकरणगुरुः) संस्कृतभाषायां पत्रव्यवहारो विधातव्यः। साप्ताहिकी पत्रिका सञ्चालनीया, तत्र नवोदितानां लेखकानां, प्राक्तनानां विचारकाणाञ्च लेखाः प्रकाशनीयाः।

उपाध्यायः- (साहित्यगुरुः) पठनपाठनावसरे संस्कृतभाषायामेव संस्कृतनिष्ठं ज्ञानं वक्तव्यम्। शिक्षकाः विद्यार्थिनश्च कक्षाकोष्ठे अन्यत्र च संस्कृतभाषामेव वदन्तु। तथा सति संस्कृतभाषापठनलेखनभाषणादौ सुकरा सेत्स्यति।

वटुः- एवमेव आचरितुं प्रयतिष्यामहे उपाध्यायाः।

प्रधानाचार्यः- किं बहुना, प्रतिग्रामं प्रतिजनपदम् एत्य संस्कृतस्य सार्वत्रिकप्रचाराय अद्य प्रतिज्ञां करवाम।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सर्वे - एवमेव वयं प्रतिजानीमहे ।

प्रधानाचार्यः- (परिचारकवर्गं प्रमाणपत्राणि, माल्याऽवीरकचूर्णफलान्याहर्तुं निर्दिशति)

प्रधानाचार्यः- भो भद्रमुख ! भो देवदत्ते !, अस्मद्गुरुकुलोच्चमाध्यमिकविद्यालयाद् उत्तीर्णपरीक्षाणां छात्राणां प्रस्थापनार्थं माल्यावीरफलानि आनयतम् ।

भद्रमुखः - प्रधानाचार्य ! त्वरितं निर्दिष्टवस्तूनि आनयाव : ।

(इति निष्क्रान्तौ)

(ततः भद्रमुखो देवदत्ता च माल्यजातम्, अवीरचूर्णम्, फलानि च हस्तयोः गृहीत्वा प्रविशतः)

देवदत्ता - प्रधानाचार्य ! आनीतानि निर्दिष्टमाल्यादीनि ।

प्रधानाचार्यः- (प्रतिविद्यार्थिमाल्यं परिधापयति । अन्ये उपस्थिता उपाध्याया आवीरकचूर्णं, फलादीनि च विद्यार्थिभ्यो वितरन्ति । प्रस्थापनावधौ उपाध्याया विद्यार्थिनश्चेषद्मलिनवदना दृश्यन्ते)

प्रधानाचार्य- विद्यार्थिभिरेकत्र अनुशासनं परिपाल्याधीतं, सफलता च अधिगतेति हेतोः प्रमोदो वर्धते चेदपरत्र भवन्तः प्रस्थाप्यमानाः सन्तीति विचार्य दुःखमपि चेतो वहति । तदपि संस्कृतवाङ्मयस्य प्रचारप्रसाराय भवतां प्रतिज्ञाबद्धतां निभाल्य वयं गुरवः समधिकं तुष्टाः स्म । भवतां भावियात्रा सफला भवत्विति कामयामहे । अस्मिन् अवसरे गुरुशिष्या मिलित्वा कानिचन संस्कृतगौरवद्योतकानि पद्यानि गायाम-

(सर्वे मिलित्वा गायन्ति)-

संस्कृताज् जायते लोकसंरक्षणं
संस्कृताज् जायते राष्ट्रसंरक्षणम् ।
संस्कृताज् जायते दीनसंरक्षणं
संस्कृताज् जायते धर्मसंरक्षणम् ॥

धर्ममुद्दिश्य भो द्वेषभावं त्यज
वर्णमुद्दिश्यभो हेयभावं त्यज ।
कार्यजाते कदाप्येव नीचोच्चता
नैव धार्येति भो संस्कृतं वक्ति नः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृते शोभते वैदिकी संस्कृतिः
संस्कृते राजते लौकिकी संस्कृतिः ।
संस्कृतौ रक्षितायां वयं रक्षिताः
संस्कृतेरेवभो भूतले संस्तुताः ॥

संस्कृते ज्ञानविज्ञानराशिर्महान्
वर्तते दर्शनञ्चातिशान्तिप्रदम् ।
वेदवेदाङ्गसाहित्यजातं जनान्
बोधयद् द्योतते भूतले संस्कृतम् ॥

धर्मशास्त्रं शुभाचारसन्दर्शकं
जीवराशिं शिवे प्रापयद् दर्शनम् ।
संस्कृतादेव संबुध्यते मानवैः
किन्न संबुध्यते संस्कृताद् मानवैः ॥

ब्रह्म किं किं जगद् जीवमाये च के
शाश्वतं किं धनं नश्वरञ्चास्ति किम् ? ।
बोद्धुमेतज्जनैः संस्कृतं पठ्यतां
संस्कृतं साधु विज्ञाय मोमुद्यताम् ॥

(तत्र हर्षातिरेकात् परिचारकः, परिचारिका कतिचन छात्राश्च गायं गायं नृत्यन्ति) (अधीतविद्याश्छात्राः प्रधानाचार्यम् उपाध्यायाञ्च प्रणम्य प्रतिष्ठन्ते ।)

भरतवाक्यम्
गुरुः स्नेहकर्ता भवेच्छिष्यवर्गे
तथा शिष्यवर्गो गुरौ भक्तिमान् स्यात् ।
उभौ मेलभावं विधायैव भूमौ
चलेतां सुशिक्षाप्रचाराय नित्यम् ॥

(इति निष्क्रान्ताः सर्वे)

॥ समाप्तमिदं गुरुकुलचर्यमित्यभिधं प्रकरणम् ॥

•••

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् संस्थायाः प्रकाशनानि

१. मङ्गलग्रहः (काव्यम्) - डा. टीकारामः पन्थी
२. कृष्णाभिसर्पणम् (काव्यम्) - महाकविः भरतराजः मन्थलीयः
३. मीमांसातर्कभाषा - डा. काशीनाथः न्यौपाने
४. चन्द्रप्रभा (काव्यम्) - डा. टीकारामः अधिकारी
५. संस्कृतकवितासङ्ग्रहः (प्रथमपुष्पम्) - संयुक्तसम्पादनम्
६. कलमाक्षरचरितकाव्यम् - प्रा. तेजः केशरी शर्मा
७. संस्कृतमा के छ ? - अनुसन्धानात्मकलेखसङ्ग्रहः
८. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
९. प्राकृतपोखरा (संस्कृते) - अनुवादकः डा. लक्ष्मीकान्तः पन्थी
१०. लङ्कावतारसूत्रम् - अनु.डा. काशीनाथः न्यौपाने
११. चार्वाकदर्शनम् - प्रा. रेवतीरमणः खनालः
१२. गौतमन्यायसूत्रम् - अनु.प्रा. पद्मप्रसादः भट्टराई
१३. ब्रह्मसूत्रम् - अनु.प्रा.डा. दीर्घराजः घिमिरे
१४. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
१५. संस्कृतकवितासङ्ग्रहः (द्वितीयपुष्पम्) - संयुक्तसम्पादनम्
१६. कामकलाविलास - प्रा. विद्यानाथ-उपाध्यायः
१७. जैनदर्शनं - तत्त्वार्थसूत्रम् - डा. चन्द्रमणिनेपालः
१८. दर्शनसारामृतम् - लोकनाथलुईंटेलः
१९. मीमांसापरिभाषा - प्रा.डा. ऋषिरामपोखरेलः
२०. समीक्षात्मकग्रन्थ - ध्रुवभट्टराई
२१. ब्रम्हाण्डपुराण - डा. बद्रीपोखेलः
२२. नेपालगौरवम् (महाकाव्यम्) - प्रा.डा. विष्णुप्रसादः देवकोटा
२३. संस्कृतकाव्यसिद्धान्त समीक्षा - डा. नवराज कट्टेल
२४. कर्मफलम् (संस्कृतरूपकसङ्ग्रहः) - प्रा.डा. नवराजकट्टेलः
२५. कवि पण्डित गायत्री गणेशप्रसाद अर्यालका ... - प्रा.डा. नवराज कट्टेल
२६. आचारिकं नाटकम् - प्रा. रामहरिदाहालः
२७. गुरुकुलचर्यम् - प्रा. रामहरिदाहालः
२८. सत्प्रभवं नाटकम् - प्रा. रामहरिदाहालः
२९. दृष्टिसृष्टिनाटकम् - प्रा. रामहरिदाहालः
३०. नेपालमाता (नाटकम्) - नारायणदत्तशास्त्री
३१. मित्रसङ्गमम् नाटकम् - आचार्यः खेमराजकेशवशरणः
३२. कृष्णागारोज्जीवनम् नाटकम् - प्रा.डा. विष्णुप्रसादः देवकोटा
३३. मातृशतकम् (शोककाव्यम्) - प्रा.डा. नवराजकट्टेलः
३४. पृथ्वीशतकम् (खण्डकाव्यम्) - प्रा.डा. नवराजकट्टेलः
३५. संस्कृतनाटिकाकौस्तुभः (लघुरूपकसंग्रहः) - सम्पा. प्रा.डा. विष्णुप्रसादः देवकोटा

ISBN 978-9937-9491-7-0
9 789937 949170